कृतं सर्वमहं मन्ये सखित्वं च त्वया वृणे ।
द्वन्द्वयुद्धं च पार्थेन कर्त्तुमिच्छाम्यहं प्रभो ॥ ७९ ॥

दुर्य्योधन उवाच

भुङ्क्ष्व भोगान् मया सार्द्धं बन्धूनां प्रियकृद् भव ।
दुर्हृदां कुरु सर्वेषां मूर्द्ध्नि पादमरिन्दम ॥ ८० ॥

वैशम्पायन उवाच

ततः क्षिप्तमिवात्मानं मत्वा पार्थोऽभ्यभाषत ।
कर्णं भ्रातृसमूहस्य मध्येऽचलमिव स्थितम् ॥ ८१ ॥

अर्जुन उवाच

अनाहूतोपविष्टानामनाहूतोपजल्पिनाम् ।
ये लोकास्तान् हतः कर्ण मया त्वं प्रतिपत्स्यसे ॥ ८२ ॥

कर्ण उवाच

रङ्गोऽयं सर्वसामान्यः किमत्र तव फाल्गुन ।
वीर्य्यश्रेष्ठाश्च राजानो बलं धर्म्मोऽनुवर्त्तते ॥ ८३ ॥
किं क्षेपैर्दुर्बलायासैः शरैः कथय भारत ।
गुरोः समक्षं यावत् ते हराम्यद्य शिरः शरैः ॥ ८४ ॥

THIRD SECTION.

वैशम्पायन उवाच

ततो द्रोणाभ्यनुज्ञातः पार्थः परपुरञ्जयः ।
भ्रातृभिस्त्वरयाश्लिष्टो रणायोपजगाम तम् ॥ ८५ ॥
ततो दुर्योधनेनापि सभ्रात्रा समरोद्यतः ।
परिष्वक्तः स्थितः कर्णः प्रगृह्य सशरं धनुः ॥ ८६ ॥
ततः सविद्युत्स्तनितैः सेन्द्रायुधपुरोगमैः ।
आवृतं गगणं मेघैर्बलाकापङ्क्तिहासिभिः ॥ ८७ ॥
ततः स्नेहाद्धरिहयं[1] दृष्ट्वा रङ्गावलोकिनम् ।
भास्करोऽप्यनयन्नाशं समीपोपगतान् घनान् ॥ ८८ ॥
मेघच्छायोपगूढस्तु ततोऽदृश्यत फाल्गुनः ।
सूर्य्यातपपरिक्षिप्तः कर्णोऽपि समदृश्यत ॥ ८९ ॥
धार्त्तराष्ट्रा यतः कर्णस्तस्मिन् देशे व्यवस्थिताः ।
भारद्वाजः कृपो भीष्मो यतः पार्थस्ततोऽभवन् ॥ ९० ॥
द्विधा रङ्गः समभवत् स्त्रीणां द्वैधमजायत ।
कुन्तिभोजसुता मोहं विज्ञातार्था जगाम ह ॥ ९१ ॥
तां तथा मोहमापन्नां विदुरः सर्वधर्मवित् ।
कुन्तीमाश्वासयामास प्रेष्याभिश्चन्दनोदकैः ॥ ९२ ॥
ततः प्रत्यागतप्राणा तावुभौ परिदंशितौ ।
पुत्रौ दृष्ट्वा सुसम्भ्रान्ता नान्वपद्यत किञ्चन ॥ ९३ ॥

[1] Harihaya, a name of Indra; he with the bay (*hari*) horses (*haya*).

तावुद्यतमहाचापौ कृपः शारद्वतोऽब्रवीत् ।
द्वन्द्वयुद्धसमाचारे कुशलः सर्वधर्मवित् ॥ ९४ ॥
अयं पृथायास्तनयः कनीयान् पाण्डुनन्दनः ।
कौरवो भवता सार्द्धं द्वन्द्वयुद्धं करिष्यति ॥ ९५ ॥
त्वमप्येवं महाबाहो मातरं पितरं कुलम् ।
कथयस्व नरेन्द्राणां येषां त्वं कुलभूषणः ॥ ९६ ॥
ततो विदित्वा पार्थस्त्वां प्रतियोत्स्यति वा न वा ।
वृथा कुलसमाचारैर्न युध्यन्ते नृपात्मजाः ॥ ९७ ॥

वैशम्पायन उवाच

एवमुक्तस्य कर्णस्य व्रीडावनतमाननम् ।
बभौ वर्षाम्बुविक्लिन्नं पद्ममागलितं यथा ॥ ९८ ॥

दुर्योधन उवाच

आचार्य्य त्रिविधा योनी राज्ञां शास्त्रविनिश्चये ।
सत्कुलीनश्च शूरश्च यश्च सेनां प्रकर्षति ॥ ९९ ॥
यद्ययं फाल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति ।
तस्मादेषोऽङ्गविषये मया राज्येऽभिषिच्यते ॥ १०० ॥

FOURTH SECTION.

वैशम्पायन उवाच

ततस्तस्मिन् क्षणे कर्णः सलाजकुसुमैर्घटैः ।
काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्म्महारथः ।
अभिषिक्तोऽङ्गराज्यस्य श्रिया युक्तो महाबलः ॥ १०१ ॥
सच्छत्रबालव्यजनो जयशब्दोत्तरेण च ।
उवाच कौरवं राजा वचनं स वृषस्तदा ॥ १०२ ॥
अस्य राज्यप्रदानस्य सदृशं किं ददानि ते ।
प्रब्रूहि राजशार्दूल कर्त्ता ह्यस्मि तथा नृप ।
अत्यन्तं सख्यमिच्छामीत्याह तं स सुयोधनः ॥ १०३ ॥
एवमुक्तस्ततः कर्णस्तथेति प्रत्युवाच तम् ।
हर्षाच्चोभौ समाश्लिष्य परां मुदमवापतुः ॥ १०४ ॥
ततः स्रस्तोत्तरपटः सप्रस्वेदः सवेपथुः ।
विवेशाधिरथो रङ्गं यष्टिप्राणो ह्वयन्निव ॥ १०५ ॥
तमालोक्य धनुस्त्यक्त्वा पितृगौरवयन्त्रितः ।
कर्णोऽभिषेकार्द्रशिराः शिरसा समवन्दत ॥ १०६ ॥
ततः पादाववच्छाद्य पटान्तेन ससम्भ्रमः ।
पुत्रेति परिपूर्णार्थमब्रवीद्रथसारथिः ॥ १०७ ॥
परिष्वज्य च तस्याथ मूर्द्धानं स्नेहविक्लवः ।
अङ्गराज्याभिषेकार्द्रमश्रुभिः सिषिचे पुनः ॥ १०८ ॥

तं दृष्ट्वा सूतपुत्रोऽयमिति सञ्चिन्त्य पाण्डवः ।
भीमसेनस्तदा वाक्यमब्रवीत् प्रहसन्निव ॥ १०९ ॥
न त्वमर्हसि पार्थेन सूतपुत्र रणे बधम् ।
कुलस्य सदृशस्तूर्णं प्रतोदो गृह्यतां त्वया ॥ ११० ॥
अङ्गराज्यं च नार्हस्त्वमुपभोक्तुं नराधम ।
श्वा हुताशसमीपस्थं पुरोडाशमिवाध्वरे ॥ १११ ॥
एवमुक्तस्ततः कर्णः किञ्चित् प्रस्फुरिताधरः ।
गगणस्थं विनिःश्वस्य दिवाकरमुदैक्षत ॥ ११२ ॥
ततो दुर्योधनः कोपादुत्पपात महाबलः ।
भ्रातृपद्मवनात् तस्मान्मदोत्कट इव द्विपः ॥ ११३ ॥
सोऽब्रवीद्भीमकर्म्माणं भीमसेनमवस्थितम् ।
वृकोदर न युक्तं ते वचनं वक्तुमीदृशम् ॥ ११४ ॥
क्षत्रियाणां बलं ज्येष्ठं योद्धव्यं क्षत्रबन्धुना ।
शूराणां च नदीनां च दुर्विदाः प्रभवाः किल ॥ ११५ ॥
सलिलादुत्थितो वह्निर्येन व्याप्तं चराचरम् ।
[1]दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥ ११६ ॥
[2]आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि ।

[1] Dadhícha, a *Rishi* or sage, who is distinguished as a votary of Śiva. The thunderbolt of Indra was formed of his bones, to destroy the Dánavas or Titans, according to the legend alluded to in the text.

[2] Ágneya, son of Agni. This and the following names allude to the legend of the birth and education of Guha or Skanda, the Mars of the Hindu Pantheon, who, as the son of Rudra or Śiva, is called Raudra. He was first fostered by Agni (whence his first patronymic Ágneya), by whom he was transferred to Gangá, the river goddess, or personified Ganges: hence he is called Gángeya. He was nursed by six nymphs, named Krittiká; and

श्रूयते भगवान् देवः सर्वगुह्यमयो गुहः ॥ ११७ ॥
क्षत्रियेभ्यश्च[1] ये जाता ब्राह्मणास्ते च ते श्रुताः ।
विश्वामित्र[2]प्रभृतयः प्राप्ता ब्रह्मत्वमव्ययम् ॥ ११८ ॥
आचार्य्यः कलशाज्जातो द्रोणः शस्त्रभृतां वरः ।
गोतमस्यान्ववाये च शरस्तम्बाच्च गौतमः[3] ॥ ११९ ॥
भवतां च यथा जन्म तदप्यागमितं मया ।
सकुण्डलं सकवचं सर्वलक्षणलक्षितम् ।
कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति ॥ १२० ॥
पृथिवीराज्यमर्हो ऽयं नाङ्गराज्यं नरेश्वरः ।
अनेन बाहुवीर्येण मया चाज्ञानुवर्त्तिना ॥ १२१ ॥
यस्य वा मनुजस्येदं न क्षान्तं मद्विचेष्टितम् ।
रथमारुह्य पद्भ्यां स विनामयतु कार्मुकम् ॥ १२२ ॥
ततः सर्वस्य रङ्गस्य हाहाकारो महानभूत् ।
साधुवादानुसम्बद्धः सूर्य्यश्चास्तमुपागमत् ॥ १२३ ॥

and is also, therefore, styled their son, Krittiká-putra, or Kártikeya. He is the planet Mars, as well as the divinity; and his nurses are immortalized as the Pleiades. The legends relating to him are no doubt, in part, astronomical.

[1] The birth of Brahmans, from Kshatriyas, alludes to a race of Brahmans called Ángirasas, who were sprung from Nabhága, one of the first princes of the solar dynasty. See Vishńu Puráńa, p. 359, note 6.

[2] Viśwámitra, the son of Gádhi, king of Kányakubja, Canogyza, or Kanoj, and therefore a Kshatriya by birth, compelled the gods to invest him with the rank and power of a Brahman, that he might be on equal terms with the Brahman Vaśishtha. His story is told at length in the Rámáyana. There are various legends in the Puráńas, from which it appears that it more frequently happened that the Kshatriya or warrior caste contended with the Brahmans for spiritual authority, than that the Brahmans struggled with them for political power.

[3] Gautama, a descendant of Gotama, a Rishi. Kripa is the person intended. See a former note.

ततो दुर्योधनः कर्णमालम्ब्याग्रकरे नृपः ।
दीपिकाग्निकृतालोकस्तस्माद्रङ्गाद्विनिर्ययौ ॥ १२४ ॥
पाण्डवाश्च सहद्रोणाः सकृपाश्च विशाम्पते ।
भीष्मेण सहिताः सर्वे ययुः स्वं स्वं निवेशनम् ॥ १२५ ॥
अर्जुनेति जनः कश्चित् कश्चित् कर्णेति भारत ।
कश्चिद्दुर्योधनेत्येवं ब्रुवन्तः प्रस्थितास्तदा ॥ १२६ ॥
कुन्त्याश्च प्रत्यभिज्ञाय दिव्यलक्षणसूचितम् ।
पुत्रमङ्गेश्वरं स्नेहाच्छन्ना प्रीतिरजायत ॥ १२७ ॥
दुर्योधनस्यापि तदा कर्णमासाद्य पार्थिव ।
भयमर्जुनसञ्जातं क्षिप्रमन्तरधीयत ॥ १२८ ॥
स चापि वीरः कृतशस्त्रनिःश्रमः परेण साम्नाभ्यवदत् सुयोधनम् ।
युधिष्ठिरस्याप्यभवत्तदा मतिर्न कर्णतुल्योऽस्ति धनुर्धरः क्षितौ॥१२९॥

॥ इति अस्त्रशिक्षा ॥

द्रोणविजयः

FIRST SECTION.

वैशम्पायन उवाच

पाण्डवान् धार्त्तराष्ट्रांश्च कृतास्त्रान् प्रसमीक्ष्य सः
गुर्वर्थं दक्षिणाकाले प्राप्तेऽमन्यत वै गुरुः ॥ १ ॥
ततः शिष्यान् समानीय आचार्य्योऽर्थमचोदयत् ।
द्रोणः सर्वानशेषेण दक्षिणार्थं महीपते ॥ २ ॥
पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्धनि ।
पर्य्यानयत भद्रं वः सा स्यात् परमदक्षिणा ॥ ३ ॥
तथेत्युक्त्वा तु ते सर्वे रथैस्तूर्णं प्रहारिणः ।
आचार्य्यधनदानार्थं द्रोणेन सहिता ययुः ॥ ४ ॥
ततोऽभिजग्मुः पाञ्चालान् निघ्नन्तस्ते नरर्षभाः ।
ममृदुस्तस्य नगरं द्रुपदस्य महौजसः ॥ ५ ॥
दुर्य्योधनश्च कर्णश्च युयुत्सुश्च[1] महाबलः ।
दुःशासनो[2] विकर्णश्च जलसन्धः सुलोचनः ॥ ६ ॥

[1] Yuyutsu is one of the sons of Dhritaráshtra. He was born of a Vaiśya handmaid.

[2] Duhśásana, and the three following names, are those of sons of Dhritaráshtra. He is the only one of whom any thing worthy of note is recorded: but he added insult to injury; having dragged Draupadí by her hair into the public assembly, when the Páńdavas had lost at dice their claims to a division of the kingdom, and were sentenced to exile. In revenge of this, Bhíma vowed, that when he returned from exile he would slay Duhśásana, and drink his blood; and he fulfilled his menace. This is the main subject of the drama entitled *Vení-samhára*, "The binding of the braid." See Specimens of the Hindu Theatre.

E

एते चान्ये च बहवः कुमारा बहुविक्रमाः ।
अहं पूर्वमहं पूर्वमित्येवं क्षत्रियर्षभाः ॥ ७ ॥
ततो वररथारूढाः कुमाराः सादिभिः सह ।
प्रविश्य नगरं सर्वे राजमार्गमुपाययुः ॥ ८ ॥
तस्मिन् काले तु पाञ्चाल्यः श्रुत्वा दृष्ट्वा महद्बलम् ।
भ्रातृभिः सहितो राजंस्त्वरया निर्ययौ गृहात् ॥ ९ ॥
ततस्तु कृतसन्नाहो यज्ञसेनो[1] महीधरः ।
शरवर्षाणि मुञ्चन्तः प्रणेदुः सर्व एव ते ॥ १० ॥
ततो रथेन शुभ्रेण समासाद्य तु कौरवान् ।
यज्ञसेनः शरान् घोरान् ववर्ष युधि दुर्जयः ॥ ११ ॥

वैशम्पायन उवाच

पूर्वमेव तु सम्मन्त्र्य पार्थो द्रोणमथाब्रवीत् ।
दर्पोद्रेकात् कुमाराणामाचार्य्यं द्विजसत्तमम् ॥ १२ ॥
एषां पराक्रमस्यान्ते वयं कुर्य्याम साहसम् ।
एतैरशक्तः पाञ्चाल्यो ग्रहीतुं रणमूर्धनि ॥ १३ ॥
एवमुक्त्वा तु कौन्तेयो भ्रातृभिः सहितोऽनघः ।
अर्द्धक्रोशे तु नगरादतिष्ठद्बहिरेव सः ॥ १४ ॥
द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः ।
शरजालेन महता मोहयन् कौरवीं चमूम् ॥ १५ ॥
तमुद्यतं रथेनैकमाशुकारिणमाहवे ।

[1] Yajnasena is a name of Drupada.

अनेकमिव सन्त्रासान्मेनिरे तत्र कौरवाः ॥ १६ ॥
द्रुपदस्य शरा घोरा विचेरुः सर्वतो दिशम् ।
ततः शङ्खाश्च भेर्य्यश्च मृदङ्गाश्च सहस्रशः ॥ १७ ॥
प्रावाद्यन्त महाराज पाञ्चालानां निवेशने ।
सिंहनादश्च सञ्जज्ञे पाञ्चालानां महात्मनाम् ।
धनुर्ज्यातलशब्दश्च संस्पृश्य गगणं महान् ॥ १८ ॥
दुर्योधनो विकर्णश्च सुबाहु[1]र्दीर्घलोचनः ।
दुःशासनश्च सङ्क्रुद्धाः शरवर्षैरवाकिरन् ॥ १९ ॥
सोऽतिविद्धो महेष्वासः पार्षतो[2] युधि दुर्जयः ।
व्यधमत् तान्यनीकानि तत्क्षणादेव भारत ॥ २० ॥
दुर्योधनं विकर्णं च कर्णं चापि महाबलम् ।
नानानृपसुतान् वीरान् सैन्यानि विविधानि च ॥ २१ ॥
ततस्तु नागराः सर्वे मुसलैर्यष्टिभिस्तदा ।
अभ्यवर्षन्त कौरव्यान् वर्षमाणा घना इव ॥ २२ ॥
सबालवृद्धास्ते पौराः कौरवानभ्ययुस्तदा ।
द्रवन्ति स्म नदन्ति स्म क्रोशन्तः पाण्डवान् प्रति ॥ २३ ॥
पाण्डवास्तु स्वनं श्रुत्वा आर्त्तानां लोमहर्षणम् ।
अभिवाद्य ततो द्रोणं रथानारुरुहुस्तदा ॥ २४ ॥
युधिष्ठिरं निवार्य्याशु मा युध्यस्वेति पाण्डवम् ।
माद्रेयौ चक्ररक्षौ तु फाल्गुनश्च तदाऽकरोत् ॥ २५ ॥

[1] Subáhu is one of the sons of Dhritaráshtra.

[2] Párshata, son of Prishata, the patronymic of Drupada.

सेनाग्रगो भीमसेनस्तदाऽभूद्गदया सह ।
तदा शत्रुस्वनं श्रुत्वा भ्रातृभिः सहितोऽनघः ।
आयाज्जवेन कौन्तेयो रथेनानादयन् दिशः ॥ २६ ॥
पाञ्चालानां ततः सेनामुद्धतार्णवनिस्वनाम् ।
भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः ।
प्रविवेश महासेनां मकरः सागरं यथा ॥ २७ ॥
स्वयमभ्यद्रवद्भीमो नागानीकं गदाधरः ।
स युद्धकुशलः पार्थो बाहुवीर्य्येण चातुलः ।
अहनत् कुञ्जरानीकं गदया कालरूपधृक् ॥ २८ ॥
ते गजा गिरिसङ्काशाः क्षरन्तो रुधिरं बहु ।
भीमसेनस्य गदया भिन्नमस्तकपिण्डकाः
पतन्ति द्विरदा भूमौ वज्रघातादिवाचलाः ॥ २९ ॥
गजानश्वान् रथांश्चैव पातयामास पाण्डवः ।
पदातींश्च रथांश्चैव न्यवधीदर्जुनाग्रजः ॥ ३० ॥
गोपाल इव दण्डेन यथा पशुगणान् वने ।
चालयन्नथ नागांश्च सञ्चचाल वृकोदरः ॥ ३१ ॥

SECOND SECTION.

वैशम्पायन उवाच

भारद्वाजप्रियं कर्त्तुमुद्यतः फाल्गुनस्तदा ।
पार्षतं शरजालेन क्षिपन् नागात् स पाण्डवः ॥ ३२ ॥
हयौघांश्च रथौघांश्च गजौघांश्च समन्ततः ।
पातयन् समरे राजन् युगान्ताग्निरिव ज्वलन् ॥ ३३ ॥
ततस्ते हन्यमाना वै पाञ्चालाः सृञ्जयास्तथा[1] ।
शरैर्नानाविधैस्तूर्णं पार्थं सञ्छाद्य सर्वशः ॥ ३४ ॥
सिंहनादं मुखैः कृत्वा समयुध्यन्त पाण्डवम् ।
तद् युद्धमभवद्घोरं सुमहाद्भुतदर्शनम् ॥ ३५ ॥
ततः किरीटी सहसा पाञ्चालान् समरेऽद्रवत् ।
छादयन्निषुजालेन महता मोहयन्निव ॥ ३६ ॥
शीघ्रमभ्यस्यतो बाणान् सन्दधानस्य चानिशम् ।
नान्तरं ददृशे किञ्चित् कौन्तेयस्य यशस्विनः ॥ ३७ ॥
सिंहनादश्च सञ्जज्ञे साधुशब्देन मिश्रितः ।
ततः पाञ्चालराजस्तु तथा सत्यजिता[2] सह ॥ ३८ ॥

[1] Srinjaya was one of the five sons of Haryaśwa, or Pánchálas, to the whole of whom, and their posterity, the denomination Srinjayas is also applied. The name also denotes a people of the North-West of India, a branch of the Pánchálas.

[2] Satyajit, a kinsman of Drupada.

त्वरमाणोऽभिदुद्राव महेन्द्रं शम्बरो[1] यथा ।
महता शरवर्षेण पार्थः पाञ्चालमावृणोत् ॥ ३९ ॥
ततो हलहलाशब्द आसीत् पाञ्चालके बले ।
जिघृक्षति महासिंहो गजानामिव यूथपम् ॥ ४० ॥
दृष्ट्वा पार्थं तदायान्तं सत्यजित् सत्यविक्रमः ।
पाञ्चालं वै परिप्रेप्सुर्धनञ्जयमदुद्रुवत् ॥ ४१ ॥
ततस्त्वर्जुनपाञ्चालौ युद्धाय समुपागतौ ।
व्यक्षोभयेतां तौ सैन्यमिन्द्रवैरोचनाविव[2] ॥ ४२ ॥
ततः सत्यजितं पार्थो दशभिर्मर्म्मभेदिभिः ।
विव्याध बलवद्गाढं तदद्भुतमिवाभवत् ॥ ४३ ॥
ततः शरशतैः पार्थं पाञ्चालः शीघ्रमार्दयत् ।
पार्थस्तु शरवर्षेण छाद्यमानो महारथः ॥ ४४ ॥
वेगं चक्रे महावेगो धनुर्ज्यामवमृज्य च ।
ततः सत्यजितश्चापं छित्वा राजानमभ्ययात् ॥ ४५ ॥
स तथा भिद्यमानेषु कार्मुकेषु पुनः पुनः ।

[1] Śambara, a *Daitya* or Titan, and consequently often engaged in contests with Indra and the gods.

[2] Vairochana is a name of Bali, the son of Prahláda, the son of Hiranyakaśipu, all eminent princes of the Daitya or Titanic family. Bali having subdued Indra and the gods, and being sole sovereign of the universe, was beguiled by Vishńu in the *Vámana* or Dwarf-*Avatára*. The seeming dwarf prayed of the king as much of the universe as he could traverse in three steps; and the prayer having been granted, the god became himself again. With one stride he compassed heaven: with a second, the earth: but he refrained from crossing over *Pátála*, or the regions under the earth, relinquishing the sovereignty of *Pátála* to Bali, in reward for his generosity and his submissiveness to Vishńu, as well as for the virtues of his father, Prahláda.

हयेषु विनियुक्तेषु विमुखोऽभवदाहवे ॥ ४६ ॥
स सत्यजितमालोक्य राजा विमुखमाहवे ।
वेगेन महता राजन्नभ्यवर्षत पाण्डवम् ॥ ४७ ॥
तस्य पार्थो धनुश्छित्त्वा ध्वजं चोर्व्यामपातयत् ।
पञ्चभिस्तस्य विव्याध हयान् सूतं च शायकैः ॥ ४८ ॥
तत उत्सृज्य तच्चापमाददानं शरावरम् ।
खड्गमुद्धृत्य कौन्तेयः सिंहनादमथाकरोत् ॥ ४९ ॥
पाञ्चालस्य रथस्येषामाप्लुत्य सहसाऽपतत् ।
विक्षोभ्याम्भोनिधिं पार्थस्तं नागमिव सोऽग्रहीत् ।
ततस्तु सर्वपाञ्चाला विद्रवन्ति दिशो दश ॥ ५० ॥
दर्शयन् सर्वसैन्यानां स बाह्वोर्बलमात्मनः ।
सिंहनादस्वनं कृत्वा निर्जगाम धनञ्जयः ॥ ५१ ॥
आयान्तमर्जुनं दृष्ट्वा कुमाराः सहितास्तदा ।
ममृदुस्तस्य नगरं द्रुपदस्य महात्मनः ॥ ५२ ॥

अर्जुन उवाच

सम्बन्धी[1] कुरुवीराणां द्रुपदो राजसत्तमः ।
मा वधीस्तद्बलं भीम गुरुदानं प्रदीयताम् ॥ ५३ ॥

[1] Drupada was related to the Páńdavas and Kauravas, being descended remotely from a common ancestor, Puru, the son of Yayáti.

THIRD SECTION.

वैशम्पायन उवाच

भीमसेनस्तदा राजन्नर्जुनेन निवारितः ।
अतृप्तो युद्धधर्मेषु न्यवर्त्तत महाबलः ॥ ५४ ॥
ते यज्ञसेनं द्रुपदं गृहीत्वा रणमूर्धनि ।
उपाजह्रुः सहामात्यं द्रोणाय भरतर्षभ ॥ ५५ ॥
भग्नदर्पं हृतधनं तं तथा वशमागतम् ।
स वैरं मनसा ध्यात्वा द्रोणो द्रुपदमब्रवीत् ॥ ५६ ॥
विमृद्य तरसा राष्ट्रं पुरं ते मृदितं मया ।
प्राप्य जीवं रिपुवशं सखिपूर्वं किमिष्यते ॥ ५७ ॥
एवमुक्त्वा प्रहस्यैवं किञ्चित् स पुनरब्रवीत् ।
मा भैः प्राणभयाद्वीर क्षमिणो ब्राह्मणा वयम् ॥ ५८ ॥
आश्रमे क्रीडितं यत्तु त्वया बाल्ये मया सह ।
तेन संवर्द्धितः स्नेहः प्रीतिश्च क्षत्रियर्षभ ॥ ५९ ॥
प्रार्थयेयं त्वया सख्यं पुनरेव जनाधिप
वरं ददामि ते राजन् राज्यस्यार्द्धमवाप्नुहि ॥ ६० ॥
अराजा किल नो राज्ञः सखा भवितुमर्हति ।
अथ प्रयतितं राज्ये यज्ञसेन मया तव ॥ ६१ ॥
राजाऽसि दक्षिणे कूले भागीरथ्याहमुत्तरे ।

[1] Bhágírathí is a name of the Ganges, from Bhagíratha, the grandson of Anśumat, the grandson of Sagara, whose austerities prevailed on Śiva to permit the descent of the sacred river

सखायं मां विजानीहि पाञ्चाल यदि मन्यसे ॥ ६२ ॥

द्रुपद उवाच

अनाश्चर्य्यमिदं ब्रह्मन् विक्रान्तेषु महात्मसु ।
प्रीये त्वयाऽहं त्वत्तश्च प्रीतिमिच्छामि शाश्वतीम् ॥ ६३ ॥

वैशम्पायन उवाच

एवमुक्तः स तं द्रोणो मोक्षयामास भारत ।
सत्कृत्य चैनं प्रीतात्मा राज्यार्द्धं प्रत्यपादयत् ॥ ६४ ॥
माकन्दीमथ[1] गङ्गायास्तीरे जनपदायुताम् ।
सोऽध्यावसद्दीनमनाः काम्पिल्यं[2] च पुरोत्तमम् ॥ ६५ ॥
दक्षिणांश्चापि पाञ्चालान् यावच्चर्मण्वती[3] नदी ।
द्रोणेन चैवं द्रुपदः परिभूयाथ पालितः ॥ ६६ ॥
क्षात्रेण च बलेनास्य नापश्यत् स पराजयम् ।
हीनं विदित्वा चात्मानं ब्राह्मेण स बलेन तु ॥ ६७ ॥
पुत्रजन्म परीप्सन् वै पृथिवीमन्वसञ्चरत् ।

river to earth, to bathe the ashes of Sagara's sons, who had been consumed by the wrath of the sage Kapila. The story is told at length in the Rámáyana, from which the descent of the Ganges has been versified by Milman.

[1] Mákandí is not elsewhere noticed.

[2] Kámpilya is probably the Kampil of the Mohammedan historians of India, and is placed by them in the Doab.

[3] Charmańvatí is the river Chumbul.

अहिच्छत्रं च विषयं द्रोणः समभिपद्यत ॥ ६८ ॥
एवं राजन्नहिच्छत्रा पुरी जनपदायुता ।
युधि निर्जित्य पार्थेन द्रोणाय प्रतिपादिता ॥ ६९ ॥

॥ इति द्रोणविजयः ॥

[1] Ahichchhatrá, in the country of Ahichchhatra, is a city of some importance in Hindu tradition, as the Brahmans who introduced their religion into the Dekhin are said to have come from thence. We have no indication more precise of its position than as is here stated—north of the Ganges.

द्रौपदीस्वयंवरः

FIRST SECTION.

वैशम्पायन उवाच

ततस्ते नरशार्दूला भ्रातरः पञ्च पाण्डवाः ।
प्रययुर्द्रौपदीं द्रष्टुं तं च देशं महोत्सवम् ॥ १ ॥
ते प्रयाता नरव्याघ्राः सह मात्रा परन्तपाः ।
ब्राह्मणान् ददृशुर्मार्गे गच्छतः सङ्गतान् बहून् ॥ २ ॥
त ऊचुर्ब्राह्मणा राजन् पाण्डवान् ब्रह्मचारिणः[1] ।
क्व भवन्तो गमिष्यन्ति कुतो वाऽभ्यागता इह ॥ ३ ॥

युधिष्ठिर उवाच

आगतानेकचक्रायाः[2] सोदर्य्यानेकचारिणः ।
भवन्तो वै विजानन्तु सह मात्रा द्विजर्षभाः ॥ ४ ॥

ब्राह्मणा ऊचुः

गच्छताद्यैव पाञ्चालान् द्रुपदस्य निवेशने ।
स्वयंवरो महांस्तत्र भविता सुमहाधनः ॥ ५ ॥

[1] *Brahmachāris*, religious students. The *Pándavas* were distinguished as Brahmans; having their heads shaved, all but a tuft of hair on the crown of the head; clothing the upper part of the body with an antelope's skin, and carrying a staff of *Palása* wood, and a water-pot. See Manu, chap. ii. ver. 41, &c.

[2] Ekachakrá is the name of a city, the site of which has not been verified.

एकसार्थं प्रयाताः स्म वयं तत्रैव गामिनः ।
तत्र ह्यद्भुतसङ्काशो भविता सुमहोत्सवः ॥ ६ ॥
यज्ञसेनस्य दुहिता द्रुपदस्य महात्मनः ।
वेदीमध्यात्[1] समुत्पन्ना पद्मपत्रनिभेक्षणा ॥ ७ ॥
दर्शनीयाऽनवद्याङ्गी सुकुमारी मनस्विनी
धृष्टद्युम्नस्य भगिनी द्रोणशत्रोः प्रतापिनः ॥ ८ ॥
यो जातः कवची खड्गी सशरः सशरासनः ।
सुसमिद्धे महाबाहुः पावके पावकोपमः ॥ ९ ॥
स्वसा तस्यानवद्याङ्गी द्रौपदी तनुमध्यमा ।
नीलोत्पलसमो गन्धो यस्याः क्रोशात् प्रवाति वै ॥ १० ॥
यज्ञसेनस्य च सुतां स्वयंवरकृतक्षणाम् ।
गच्छामो वै वयं द्रष्टुं तं च दिव्यं महोत्सवम् ॥ ११ ॥
राजानो राजपुत्राश्च यज्वानो भूरिदक्षिणाः ।
स्वाध्यायवन्तः शुचयो महात्मानो यतव्रताः ॥ १२ ॥
तरुणा दर्शनीयाश्च नानादेशसमागताः ।

[1] Born from the altar. After his disgrace, and the dismemberment of his kingdom, Drupada, burning with resentment, had recourse to supernatural agency to procure the birth of a son, who should one day avenge his defeat, and accomplish the death of Dróńa. After some difficulty, he prevailed on two learned Brahmans, named Yája and Upayája; who performed a sacrifice for this purpose, and at the proper period summoned the queen of Drupada to assist at the rite. Her majesty was engaged at her toilet; and delaying her arrival with true feminine want of punctuality, the ceremony was completed without her. Two children, one male, one female, arose from out of the sacrificial fire. The former was Dhrishtadyumna, who appeared with a diadem on his head, armed in full mail, and bearing a bow and arrow in his hand: he was mainly instrumental in Dróńa's death. The latter was Krishńá, so named from her black complexion, although of exceeding beauty. She is more usually known by her patronymic Draupadí, the daughter of Drupada.

महारथाः कृतास्त्राश्च समुपैष्यन्ति भूमिपाः ॥ १३ ॥
ते तत्र विविधान् दायान् विजयार्थं नरेश्वराः ।
प्रदास्यन्ति धनं गाश्च भक्ष्यं भोज्यं च सर्वशः ॥ १४ ॥
प्रतिगृह्य च तत्सर्वं दृष्ट्वा चैव स्वयंवरम् ।
अनुभूयोत्सवं चैव गमिष्यामो यथेप्सितम् ॥ १५ ॥
नटा[1] वैतालिकास्तत्र नर्त्तकाः सूतमागधाः ।
नियोधकाश्च देशेभ्यः समेष्यन्ति महाबलाः ॥ १६ ॥
एवं कौतूहलं कृत्वा दृष्ट्वा च प्रतिगृह्य च ।
सहास्माभिर्महात्मानः पुनः प्रतिनिवर्त्स्यथ ॥ १७ ॥
दर्शनीयांश्च वः सर्वान् देवरूपानवस्थितान् ।
समीक्ष्य कृष्णा वरयेत् सङ्गत्यैकतमं वरम् ॥ १८ ॥
अयं भ्राता तव श्रीमान् दर्शनीयो महाभुजः ।
नियुज्यमानो विजयेत् सङ्गत्या द्रविणं बहु ॥ १९ ॥

युधिष्ठिर उवाच

परमं भो गमिष्यामो द्रष्टुं चैव महोत्सवम् ।

[1] The persons named in the text are Naṫas, Vaitálikas, Narttakas, Sútas, Mágadhas, and Niyodhakas. The Naṫa is properly an actor; but in modern use the term comprehends jugglers, buffoons, and individuals practising sleight of hand and feats of agility and strength. In this last circumstance the Narttaka partakes, although he is properly a dancer. The Vaitálika, in his official capacity, is a poetical watchman or bellman; who, as in Europe in the middle ages, announced the changes of the season, or the watches of the day and night, in verse: when not thus employed, he was a public singer or reciter. The Sútas and Mágadhas discharge the same sort of duties; but are also bards and heralds, forming part of the suite of every Hindu of rank, to chaunt his praises, celebrate his exploits, and commemorate his ancestry and alliances. The Niyodhaka is a prize-fighter—either a wrestler, a boxer, or a swordsman. In some parts of India, when he boxes, his hands are armed with gauntlets equipped with sharp steel spikes.

भवद्भिः सहिताः सर्वे कन्यायास्तं स्वयंवरम् ॥ २० ॥

वैशम्पायन उवाच

एवमुक्ताः प्रयातास्ते पाण्डवा जनमेजय ।
राज्ञा दक्षिणपाञ्चालान् द्रुपदेनाभिरक्षितान् ॥ २१ ॥
ततस्तेषु महात्मानं शुद्धात्मानमकल्मषम् ।
ददृशुः पाण्डवा वीरा मुनिं द्वैपायनं[1] तदा ॥ २२ ॥
तस्मै यथावत् सत्कारं कृत्वा तेन च सत्कृताः ।
कथान्ते चाभ्यनुज्ञाताः प्रययुर्द्रुपदक्षयम् ॥ २३ ॥
पश्यन्तो रमणीयानि वनानि च सरांसि च ।
तत्र तत्र वसन्तश्च शनैर्जग्मुर्महारथाः ॥ २४ ॥
स्वाध्यायवन्तः शुचयो मधुराः प्रियवादिनः ।
आनुपूर्व्येण सम्प्राप्ताः पाञ्चालान् पाण्डुनन्दनाः ॥ २५ ॥
ते तु दृष्ट्वा पुरं तच्च स्कन्धावारं च पाण्डवाः ।
कुम्भकारस्य शालायां निवासं चक्रिरे तदा ॥ २६ ॥
तत्र भैक्ष्यं समाजह्रुर्ब्राह्मणीं वृत्तिमाश्रिताः ।
तान् सम्प्राप्तांस्तथा वीरान् जज्ञिरे न नराः क्वचित् ॥ २७ ॥
यज्ञसेनस्य कामस्तु पाण्डवाय किरीटिने ।
कृष्णां दद्यामिति सदा न चैतद् विवृणोति सः ॥ २८ ॥
सो ऽन्वेषमाणः कौन्तेयं पाञ्चाल्यो जनमेजय ।
दृढं धनुरनायम्यं कारयामास भारत ॥ २९ ॥

[1] Dwaipáyana, a name of Vyása. See page 8.

यन्त्रं[1] वैहायसं चापि कारयामास कृत्रिमम् ।
तेन यन्त्रेण समितं राजा लक्ष्यं चकार सः ॥ ३० ॥

SECOND SECTION.

द्रुपद उवाच

इदं सज्यं धनुः कृत्वा सज्जैरेभिश्च सायकैः ।
अतीत्य लक्ष्यं यो वेद्धा स लब्धा मत्सुतामिति ॥ ३१ ॥

वैशम्पायन उवाच

इति स द्रुपदो राजा स्वयंवरमघोषयत् ।

[1] *Yantram vaiháyasam.* It is not easy to propose a satisfactory explanation of the nature of the test devised for the discovery of Arjuna, by his superior skill in archery. The matchlock has long since supplanted the bow and arrow in India; and no traces are left of that dexterity in the use of the latter, in which the Hindus seem to have rivalled their neighbours, the Parthians. The exploits of the semi-divine heroes of the Mahábhárata are, however, of the marvellous, and would be, perhaps, little intelligible, even if they could be illustrated by modern practice. The text seems to intend stating, that a moveable mark was suspended in the air, and whirled rapidly round upon a pivot; that upon a level with the plane of the circle which it described was fixed, upon one side of it, a hoop or ring; and that five arrows were to be simultaneously shot through the ring as the mark came opposite to it. This feat was worthy of Arjuna. It might have baffled Robin Hood. None of the competitors, however, have any chance; for, like the suitors of Penelope, they cannot even bend the bow—

—— *οὐδ᾽ ἐδύναντο*
Ἐντανύσαι, πολλὸν δὲ βίης ἐπιδευέες ἦσαν.

It is still a favourite exercise with the Hindus to bend a bow made of a very stubborn bambu, and strung with an iron chain, or cord loaded with iron plates; and it requires no ordinary muscularity to effect the object.

तच्छ्रुत्वा पार्थिवाः सर्वे समीयुस्तत्र भारत ॥ ३२ ॥
ऋषयश्च महात्मानः स्वयंवरदिदृक्षवः ।
दुर्योधनपुरोगाश्च सकर्णाः कुरवो नृप ॥ ३३ ॥
ब्राह्मणाश्च महाभागा देशेभ्यः समुपागमन् ।
ततोऽर्चिता राजगणा द्रुपदेन महात्मना ॥ ३४ ॥
उपोपविष्टा मञ्चेषु द्रष्टुकामाः स्वयंवरम् ।
ततः पौरजनाः सर्वे सागरोद्धूतनिःस्वनाः ॥ ३५ ॥
शिशुमारशिरः[1] प्राप्य न्यविशंस्ते स्म पार्थिवाः ।
प्रागुत्तरेण नगराद्भूमिभागे समे शुभे
समाजवाटः शुशुभे भवनैः सर्वतो वृतः ॥ ३६ ॥
प्राकारपरिखोपेतो द्वारतोरणमण्डितः ।
वितानेन विचित्रेण सर्वतः समलङ्कृतः ॥ ३७ ॥
तूर्य्यौघशतसङ्कीर्णः पराद्ध्यागुरुधूपितः ।
चन्दनोदकसिक्तश्च माल्यदामोपशोभितः ॥ ३८ ॥
कैलास[2]शिखरप्रख्यैर्नभस्तलविलेखिभिः ।
सर्वतः संवृतः शुभ्रैः प्रासादैः सुकृतोच्छ्रयैः ॥ ३९ ॥

[1] 'The head of the *Sísumára.*' The *Sísumára* is properly the *Gangetic* porpoise (Delphinus Gangeticus), but it means also a celestial dolphin, or aggregate of constellations, being the northern hemisphere of the heavens. In this place the expression is said to be synonymous with North-west.

[2] 'Peaks of *Kailása.*' In fabulous mythology, Kailása is one of the branches of Mount Meru, the great mountain in the centre of the earth. It runs East and West, and has upon it the cities of the gods. In actual geography, the name is applied to the range of lofty mountains that crosses Tibet, parallel, and next in succession to, the Himálayas, and nearly as elevated.

सुवर्णजालसंवीतैर्मणिकुट्टिमभूषितैः ।
सुखारोहणसोपानैर्महासनपरिच्छदैः ॥ ४० ॥
अग्राम्यसमवच्छन्नैरगुरूत्तमवासितैः ।
हंसांशुवर्णैर्बहुभिरायोजनसुगन्धिभिः ॥ ४१ ॥
असम्बाधशतद्वारैः शयनासनशोभितैः ।
बहुधातुपिनद्धाङ्गैर्हिमवच्छिखरैरिव ॥ ४२ ॥
तत्र नानाप्रकारेषु विमानेषु स्वलङ्कृताः ।
स्पर्द्धमानास्तदान्योन्यं निषेदुः सर्वपार्थिवाः ॥ ४३ ॥
तत्रोपविष्टान् ददृशुर्महासत्त्वपराक्रमान् ।
राजसिंहान् महाभागान् कृष्णागुरुविभूषितान् ॥ ४४ ॥
महाप्रसादान् ब्रह्मण्यान् स्वराष्ट्रपरिरक्षिणः ।
प्रियान् सर्वस्य लोकस्य सुकृतैः कर्मभिः शुभैः ॥ ४५ ॥
मञ्चेषु च परार्द्ध्येषु पौरजानपदा जनाः ।
कृष्णादर्शनसिद्ध्यर्थं सर्वतः समुपाविशन् ॥ ४६ ॥
ब्राह्मणैस्ते च सहिताः पाण्डवाः समुपाविशन् ।
ऋद्धिं पाञ्चालराजस्य पश्यन्तस्तामनुत्तमाम् ॥ ४७ ॥
ततः समाजो ववृधे स राजन् दिवसान् बहून् ।
रत्नप्रदानबहुलः शोभितो नटनर्त्तकैः ॥ ४८ ॥
वर्त्तमाने समाजे तु रमणीये ऽह्नि षोडशे ।
आप्लुताङ्गी सुवसना सर्वाभरणभूषिता ॥ ४९ ॥
मालां च समुपादाय काञ्चनीं समलङ्कृताम् ।
अवतीर्णा ततो रङ्गं द्रौपदी भरतर्षभ ॥ ५० ॥

पुरोहितः सोमकानां[1] मन्त्रविद् ब्राह्मणः शुचिः ।
परिस्तीर्य्य जुहावाग्निमाज्येन विधिवत् तदा ॥ ५१ ॥
स तर्पयित्वा ज्वलनं ब्राह्मणान् स्वस्तिवाच्य च ।
वारयामास सर्वाणि वादित्राणि समन्ततः ॥ ५२ ॥
निःशब्दे तु कृते तस्मिन् धृष्टद्युम्नो विशाम्पते ।
रङ्गमध्ये गतस्तत्र मेघगम्भीरया गिरा ।
वाक्यमुच्चैर्जगादेदं श्लक्ष्णमर्थवदुत्तमम् ॥ ५३ ॥
इदं धनुर्लक्ष्यमिमे च बाणाः शृण्वन्तु मे भूपतयः समेताः ।
छिद्रेण यन्त्रस्य समर्पयध्वं शरैः शितैर्व्योमचरैर्दशार्द्धैः ॥ ५४ ॥
एतन्महत् कर्म्म करोति यो वै कुलेन रूपेण बलेन युक्तः ।
तस्याद्य भार्य्या भगिनी ममेयं कृष्णा भवित्री न मृषा ब्रवीमि ॥ ५५ ॥
तानेवमुक्त्वा द्रुपदस्य पुत्रः पश्चादिदं तां भगिनीमुवाच ।
नाम्ना च गोत्रेण च कर्म्मणा च सङ्कीर्त्तयन् भूमिपतीन् समेतान् ॥ ५६

धृष्टद्युम्न उवाच

दुर्य्योधनो[2] दुर्विषहो दुर्मुखो दुःप्रधर्षणः ।
विविंशतिर्विकर्णश्च सहो दुःशासनस्तथा ॥ ५७ ॥
युयुत्सुर्वायुवेगश्च भीमवेगरवस्तथा ।
उग्रायुधो बलाकी च करकायुर्विरोचनः ॥ ५८ ॥

[1] Somaka was the grandfather of Drupada; and hence the name is applied to the family.

[2] Duryodhana has been already mentioned. The names that follow, for three stanzas, are those of the most distinguished of his hundred brothers.

कुण्डकश्चित्रसेनश्च सुवर्चाः कनकध्वजः ।
नन्दको बाहुशाली च तुहुण्डो विकटस्तथा ॥ ५९ ॥
एते चान्ये च बहवो धार्त्तराष्ट्रा महाबलाः ।
कर्णेन सहिता वीरास्त्वदर्थं समुपागताः ॥ ६० ॥
असङ्ख्याता महात्मानः पार्थिवाः क्षत्रियर्षभाः ।
[1]शकुनिः सौबलश्चैव वृषकोऽथ बृहद्बलः ॥ ६१ ॥
एते गान्धारराजस्य सुताः सर्वे समागताः ।
अश्वत्थामा च भोज[2]श्च सर्वशस्त्रभृतां वरौ ॥ ६२ ॥
समवेतौ महात्मानौ त्वदर्थं समलङ्कृतौ ।
पौ[3]ण्ड्रको वासुदेवश्च भ[4]गदत्तश्च वीर्यवान् ॥ ६३ ॥

[1] This and the three following names are said in the text to denote the sons of the Raja of Gándhára: they are, consequently, brothers of Gándhárí, and uncles of the sons of Dhritaráshtra. Śakuni was the especial friend and counsellor of Duryodhana; and his advice was the main cause of the fatal dissension that ensued between the Páńdavas and Kauravas.

[2] Bhoja is no doubt the same with Mahábhoja, a prince of the Yádava family, who with his descendants reigned at Mrittikavatí, on the Parnása river, in Malwa. At a much later period, it was the appellation of a celebrated patron of Hindu literature, a prince who reigned at Dhár, in Malwa, at the end of the tenth century; from whom, as well as the Bhoja of the Mahábhárata, the inhabitants of Bhojpur, an extensive division of North Behar, claim to have descended.

[3] Pauńdráka, king of Puńdra; a name that was formerly applied to Bengal Proper, with part of South Behar and the *Jungle Mehals*. Pauńdraka is remarkable in Hindu tradition, as having set up as a demigod, in opposition to Krishńa; calling himself, as alluded to in the text, *the* Vásudeva, or the true son of Vasudeva, whose son Krishńa is always represented to be. Krishńa defeated and slew his rival. The story is a curious one, and not without historical importance. Vishńu Puráńa, p. 597.

[4] Bhagadatta was king of Kámarúp, or Assam, who took part with the Kauravas, and was slain in the ensuing war.

कलिङ्गस्ताम्रलिप्तश्च पत्तनाधिपतिस्तथा ।
एते चान्ये च बहवो नानाजनपदेश्वराः ॥ ६४ ॥
त्वदर्थमागता भद्रे क्षत्रियाः प्रथिता भुवि ।
एते भेत्स्यन्ति विक्रान्तास्त्वदर्थे लक्ष्यमुत्तमम् ।
विध्येत य इदं लक्ष्यं वरयेथाः शुभेऽद्य तम् ॥ ६५ ॥

THIRD SECTION.

वैशम्पायन उवाच

तेऽलङ्कृताः कुण्डलिनो युवानः परस्परं स्पर्द्धमाना नरेन्द्राः ।
अस्त्रं बलं चात्मनि मन्यमानाः सर्व्वे समुत्पेतुरुदायुधास्ते ॥६६॥
रूपेण वीर्य्येण कुलेन चैव शीलेन वित्तेन च यौवनेन ।

[1] Kalinga is properly the name of a country, here put for its king. It was the portion of the Coromandel coast north of Drávira, or Madras, extending towards the mouths of the Ganges, from which it was separated by the kingdom next named. This part of the coast has always been, and is still known to the people on the east of the Bay of Bengal, from Burmah to Java, as Kling.

[2] Tamalipta, or Támralipta, also used for the name of its Raja, is the country immediately on the west of the Bhágírathí—Tamlook, Hijjalee, and Midnapur.

[3] Pattana means, properly, any city; which, or the districts of which, is here intended, is uncertain. It was applied to the capital of the Guzerat Princes, but at a subsequent date. At this period, Krishńa was regent of Guzerat, and his capital was Dwáraká. At present, the name is given to the principal commercial city of Behar, or Patna. But the capital of Magadha, or Behar, at this time was Rajgriha, the traces of which are still visible at Rajgarh, amongst the hills between Patna and Gaya. The Raja of Rajgriha was Jarasandah, who was afterwards slain by Krishńa. A number of names have been omitted; as the list is little better than a barren catalogue, and is more tedious than interesting.

समिद्धदर्पा मदवेगभिन्ना मत्ता यथा हैमवता गजेन्द्राः ॥ ६७ ॥
परस्परं स्पर्द्धया प्रेक्षमाणाः सङ्कल्पजेनाभिपरिप्लुताङ्गाः ।
कृष्णा ममैवेत्यभिभाषमाणा नृपासनेभ्यः सहसोदतिष्ठन् ॥ ६८ ॥
ते क्षत्रिया रङ्गगताः समेता जिगीषमाणा द्रुपदात्मजां ताम् ।
चकाशिरे पर्वतराजकन्यामुमां यथा देवगणाः समेताः ॥ ६९ ॥
कन्दर्प[1]वाणाभिनिपीडिताङ्गाः कृष्णागतैस्ते हृदयैर्नरेन्द्राः ।
रङ्गावतीर्णा द्रुपदात्मजार्थे द्वेषं प्रचक्रुः सुहृदोऽपि तत्र ॥ ७० ॥
अथाययुर्देवगणा[2] विमानै रुद्रादित्या वसवो[3]ऽथाश्विनौ च ।
साध्याश्च सर्वे मरुत[1]स्तथैव यमं पुरस्कृत्य धनेश्वरं च ॥ ७१ ॥
दैत्याः[5] सुपर्णाश्च[6] महोरगाश्च[7] देवर्षयो[8] गुह्यकचारणाश्च[9] ।

[1] Kandarpa is a name of the Hindu Cupid.

[2] Devagańas. Hindu mythology enumerates various *gańas*, companies or troops of inferior divinities; some of whom are frequently, others but rarely, introduced. The *Rudras* are eleven in number, personifications of Śiva, and attendants upon him. The *Ádityas* are twelve suns; that is, they represent the sun as presiding over each month of the year.

[3] The *Vasus* are eight divinities who are chiefly known as attendants upon Indra. The *Áswins* are two, the twin sons of *Súrya*, or the sun by his wife Sanjná transformed to a mare; whence their appellation, from *Aśwá*, 'a mare.' They are also represented by two stars forming the first of the lunar asterisms. The *Sádhyas* are the personified prayers and rites of the Vedas.

[4] The *Maruts*, or Winds, are forty-nine in number; and are appropriately attendants upon Indra, as king of the firmament.

[5] The Daityas are the first-born sons of Kaśyapa, by Diti daughter of Daksha. They are the *Titans* and Giants of Hindu mythology.

[6] Suparńa, more frequently called Garuda, was born to Kaśyapa by Vinatá. He is the king of the feathered tribes, and the remorseless enemy of the serpent race.

[7] The *Uragas* are the *Nágas*, by whom *Pátála* is inhabited.

[8] *Devarshis*, or *Deva rishis*, are sages of a divine origin, but leading a life of penance and devotion, principally on earth.

[9] *Guhyakas* and *Cháranas* are inferior divinities, attendant upon Kuvera, the god of wealth.

विश्वावसु[1]र्नारद[2]पर्वतौ[3] च गन्धर्वमुख्याः सहसाप्सरोभिः[4] ॥ ७२ ॥
हलायुध[5]स्तत्र जनार्दन[6]श्च वृष्ण्यन्धका[7]श्चैव यथाप्रधानम् ।
प्रेक्षां स्म चक्रुर्यदुपुङ्गवास्ते स्थिताश्च कृष्णस्य मते महान्तः॥७३
दृष्ट्वा तु तान् मत्तगजेन्द्ररूपान् पञ्चाभिपद्मानिव वारणेन्द्रान् ।
भस्मावृताङ्गानिव हव्यवाहान् कृष्णः प्रदध्यौ यदुवीरमुख्यः॥७४
शशंस रामाय[8] युधिष्ठिरं स भीमं सजिष्णुं च यमौ च वीरौ ।
शनैः शनैस्तान् प्रसमीक्ष्य रामो जनार्दनं प्रीतमना ददर्श ॥७५
अन्ये तु वीरा नृपपुत्रपौत्राः कृष्णागतैर्नेत्रमनःस्वभावैः ।

[1] Viśwávasu is one of the chief of the *Gandharvas*, who are presently named, and who are the singers and musicians of the court of Indra.

[2] Nárada, a divine sage, according to some accounts the son of Brahmá. He is always represented as carrying a *Víńá* or lute; and one legend affirms his having been, in one of his births, the chief of the heavenly musicians or *Gandharvas*. Considered as a real person, he may have been an early teacher of musical science.

[3] Parvata is a divine *Rishi;* of whom little is known, except that he is called a son of Kaśyapa. He is usually named together with Nárada.

[4] The *Apsarasas* are the nymphs of Indra's heaven. In one age they were the daughters of Kaśyapa; in another, they were produced, like Aphrodite, from the waves of the ocean, when it was churned for ambrosia. Several of these ladies make a distinguished figure in the poetry and drama of the Hindus. See the *Vikramorvasí*.

[5] Haláyudha, a name of Balaráma, the elder brother of Krishńa, having the shaft of a plough (*hala*) for his weapon (*áyudha*).

[6] Janárddana, a name of Krishńa, who receives the adoration (*arddana*) of mankind (*jana*).

[7] Vrishńis and Andhakas, two branches of the Yádava family; of which Krishńa represented the more important, though not the senior branch. The Vrishńis descended from Vrisha the son of Madhu; descended from Sahasrajit, the eldest son of Yadu. There is also a Vrishńi, who, with Andaka, is a son of Satwata, a descendant of Kroshtri, the second of the sons of Yadu. The Yádavas, Jadavas, Jados, or Jats, are a race widely spread throughout India. The principal branches were formerly settled in the west of Malwa, Rajputana, and Guzerat. The Jharejas of Cutch pretend to be of Yádava origin; so do the Jats of Bhurtpore; and even the Hindu Rajas of Mysore claim to spring from this race.

[8] Ráma is here intended for Balaráma.

व्यायच्छमाना ददृशुर्न तान् वै सन्दष्टदन्तच्छदताम्रनेत्राः ॥७६

तथैव पार्थाः पृथुबाहवस्ते वीरौ यमौ चैव महानुभावौ ।

तां द्रौपदीं प्रेक्ष्य तदा स्म सर्वे कन्दर्पबाणाभिहता बभूवुः ॥७७॥

देवर्षिगन्धर्वसमाकुलं तत्सुपर्णनागा[1]सुर[2]सिद्धजुष्टम् ।

दिव्येन गन्धेन समाकुलं च दिव्यैश्च पुष्पैरवकीर्य्यमाणम् ॥७८॥

महास्वनैर्दुन्दुभिनादितैश्च बभूव तत्सङ्कुलमन्तरीक्षम् ।

विमानसम्बाधमभूत् समन्तात् सवेणुवीणापणवानुनादम् ॥७९

ततस्तु ते राजगणाः क्रमेण कृष्णानिमित्तं कृतविक्रमाश्च ।

सकर्णदुर्य्योधन[3]शाल्वशल्य[4]द्रौणायनि[5]क्राथसुनीथवक्राः ॥ ८० ॥

कलिङ्ग[6]वङ्गाधिप[7]पाण्ड्यपौण्ड्रा [8]विदेहराजो [9]यवनाधिपश्च ।

[1] *Asuras,* the same as *Daityas* or Titans, enemies of the *Suras* or gods.

[2] *Siddhas.* These are celestial beings, who are said to people the atmospheric regions beyond the orbit of the sun.

[3] Śálwa, the name of a king as well as of a country, somewhere in the west of India. Śalya is king of the Madras, a people of the Punjab, whose capital was *Sakala*, the *Sangala* apparently destroyed by Alexander. He is one of the principal leaders and warriors of the party of Duryodhana.

[4] Draunáyani, the son of Drońa, the patronymic of Aśwattháman, of whom mention has already been made.

[5] Krátha, Sunítha, and Vakra, are names of princes of whom nothing particular is known.

[6] Banga applies not to Bengal in the modern acceptation, but to the districts north of the Bhágírathí—Jessore, Krishnagur, &c.

[7] Páńdya is a part of the south of the peninsula of which Madura was the capital. It was a state of great political power for some centuries before, and after the Christian æra. It was well known to the Romans, as the kingdom of King Pandion, who is said to have sent ambassadors, on two different occasions, to Augustus Cæsar. It seems to have sunk into insignificance under the ascendancy of the Chola Rajas, about the 7th or 8th century.

[8] Videha is the modern province of Tirhut.

[9] The King of the *Yavanas,* or Greeks, is not so impossible a competitor at Draupadí's *Swayamvara* as might be supposed; at least, according to the notions of the author of the Mahábhárata, to whom the Greeks of Bactria, and the provinces bordering on the Indus, were

अन्ये च नानानृपपुत्रपौत्रा राष्ट्राधिपाः पङ्कजपत्रनेत्राः ॥८१॥
किरीटहाराङ्गदचक्रवालैर्विभूषिताङ्गाः पृथुबाहवस्ते ।
अनुक्रमं विक्रमसत्त्वयुक्ता बलेन वीर्य्येण च नर्दमानाः ॥८२॥
तत्कार्मुकं संहननोपपन्नं सज्यं न शेकुर्म्मनसाऽपि कर्त्तुम् ।
ते विक्रमन्तः स्फुरता दृढेन विक्षिप्यमाणा धनुषा नरेन्द्राः ॥८३
विचेष्टमाना धरणीतलस्था यथाबलं शैक्ष्यगुणक्रमाश्च ।
गतौजसः स्रस्तकिरीटहारा विनिश्वसन्तः शमयाम्बभूवुः ॥८४॥
हाहाकृतं तद्धनुषा दृढेन विस्रस्तहाराङ्गदचक्रवालम् ।
कृष्णानिमित्तं विनिवृत्तकामं राज्ञां तदा मण्डलमार्त्तमासीत् ॥८५
सर्वान् नृपांस्तान् प्रसमीक्ष्य कर्णो धनुर्धराणां प्रवरो जगाम ।
उद्धृत्य तूर्णं धनुरुद्यतं तत्सज्यं चकाराशु युयोज बाणान् ॥८६॥
दृष्ट्वा सूतं मेनिरे पाण्डुपुत्रा भित्त्वा नीतं लक्ष्यवरं धरायाम् ।
धनुर्धरा राजकृतप्रतिज्ञमत्यग्निसोमार्कमथार्कपुत्रम् ॥ ८७ ॥
दृष्ट्वा तु तं द्रौपदी वाक्यमुच्चैर्जगाद नाहं वरयामि सूतम् ।
सामर्षहासं प्रसमीक्ष्य सूर्य्यं तत्याज कर्णः स्फुरितं धनुस्तत् ॥८८

were probably familiar. The Asiatics have always applied to the Greeks, names evidently derived from their Asiatic residence, or Ionians. Even as late as the ninth century, when the Greek writers and the Greek empire were well known to the Mohammedans, the Greeks were called *Yunánis*. Yavan is derived from the same term, which, as written in Hebrew characters, may be read either Ion or Iavan, according to the vowel-points. So, in its Pali form, the word is Yona or Jona; as the edict of Asoka, upon the rocks of Orissa and Guzerat, records the name of Antiochus, the Yona or Jona Raja. A curious additional proof that the Greeks are intended by the word *Yavana*, occurs in the example of a rule of Sanskrit Grammar for the application of the present participle of the *átmane-pada*: it is, *Śayáná bhunjate Yavanáh*, 'The Yavanas eat sleeping,' *i.e.* recumbent; a posture likely to have attracted notice, as quite different from the attitude in which, as far as we have reason to believe, any Asiatic people took their food.

एवं तेषु निवृत्तेषु क्षत्रियेषु समन्ततः ।
चेदीनामधिपो वीरो बलवानन्तकोपमः ॥ ८९ ॥
दमघोषसुतो धीरः शिशुपालो[1] महामतिः ।
धनुरादायमानस्तु जानुभ्यामगमन्महीम् ॥ ९० ॥
ततो राजा महावीर्य्यो जरासन्धो[2] महाबलः ।
धनुषोऽभ्यासमागत्य तस्थौ गिरिरिवाचलः ॥ ९१ ॥
धनुषा पीड्यमानस्तु जानुभ्यामगमन्महीम् ।
तत उत्थाय राजा स स्वराष्ट्राण्यभिजग्मिवान् ॥ ९२ ॥
ततः शल्यो महावीर्य्यो मद्रराजो महाबलः ।
तदप्यारोप्यमाणस्तु जानुभ्यामगमन्महीम् ॥ ९३ ॥
तस्मिंस्तु सम्भ्रान्तजने समाजे निक्षिप्तवादेषु जनाधिपेषु ।
कुन्तीसुतो जिष्णुरियेष कर्त्तुं सज्जं धनुस्तत् सशरं प्रवीरः ॥९४॥

FOURTH SECTION.

वैशम्पायन उवाच

यदा निवृत्ता राजानो धनुषः सज्जकर्म्मणः ।
अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥ ९५ ॥

[1] Śiśupála, the son of Damaghosha, king of Chedi, the modern Chandail and Boglekand, had for his mother Śrutadevá, sister of Vasudeva; and was, therefore, first-cousin of Krishńa, to whom he was, nevertheless, the implacable enemy, and by whom he was at last slain.

[2] Jarásandha was king of Rajgriha, in Behar. He was the enemy of Krishńa, but was at last killed by him, with the assistance of Bhíma and Arjuna.

उदक्रोशन् विप्रमुख्या विधुन्वन्तोऽजिनानि च ।
दृष्ट्वा सम्प्रस्थितं पार्थमिन्द्रकेतुसमप्रभम् ॥ ९६ ॥
केचिदासन् विमनसः केचिदासन् मुदान्विताः ।
आहुः परस्परं केचिन्निपुणा बुद्धिजीविनः ॥ ९७ ॥
यत्कर्म्म शल्यप्रमुखैः क्षत्रियैर्लोकविश्रुतैः
नानतं बलवद्भिर्हि धनुर्वेदपरायणैः ॥ ९८ ॥
तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा ।
वटुमात्रेण शक्यं हि सज्यं कर्त्तुं धनुर्द्विजाः ॥ ९९ ॥
अवहास्या भविष्यन्ति ब्राह्मणाः सर्वराजसु ।
कर्मण्यस्मिन्नसंसिद्धे चापलादपरीक्षिते ॥ १०० ॥
यद्येष दर्पाद्धर्षाद्वाप्यथ ब्राह्मणचापलात् ।
प्रस्थितो धनुरायन्तुं वार्य्यतां साधु मागमत् ॥ १०१ ॥

ब्राह्मणा ऊचुः

नावहास्या भविष्यामो न च लाघवमास्थिताः ।
न च विद्विष्टतां लोके गमिष्यामो महीक्षिताम् ॥ १०२ ॥
केचिदाहुर्युवा श्रीमान् नागराजकरोपमः ।
पीनस्कन्धोरुबाहुश्च धैर्य्येण हिमवानिव ॥ १०३ ॥
सिंहखेलगतिः श्रीमान् मत्तनागेन्द्रविक्रमः ।
सम्भाव्यमस्मिन् कर्मेदमुत्साहाच्चानुमीयते ॥ १०४ ॥
शक्तिरस्य महोत्साहा न ह्यशक्तः स्वयं व्रजेत् ।
न च तद् विद्यते किञ्चित् कर्म्म लोकेषु यद् भवेत् ।

ब्राह्मणानामसाध्यं च नृषु संस्थानचारिषु ॥ १०५ ॥
अभक्षा वायुभक्षाश्च फलाहारा दृढव्रताः ।
दुर्बला अपि विप्रा हि बलीयांसः स्वतेजसा ॥ १०६ ॥
ब्राह्मणो नावमन्तव्यः सदसद्वा समाचरन् ।
सुखं दुःखं महद्ध्रस्वं कर्म्म यत्समुपागतम् १०७ ॥
जामदग्न्येन[1] रामेण निर्जिताः क्षत्रिया युधि ।
पीतः समुद्रो ऽगस्त्येन[2] अगाधो ब्रह्मतेजसा ॥ १०८ ॥
तस्माद्ब्रुवन्तु सर्वे ऽच वटुरेष धनुर्महान् ।
आरोपयतु शीघ्रं वै तथेत्यूचुर्द्विजर्षभाः ॥ १०९ ॥
एवं तेषां विलपतां विप्राणां विविधा गिरः ।
अर्जुनो धनुषो ऽभ्यासे तस्थौ गिरिरिवाचलः ॥ ११० ॥
स तद् धनुः परिक्रम्य प्रदक्षिणमथाकरोत् ।
प्रणम्य शिरसा देवम्[3]ईशानं वरदं प्रभुम् ।
कृष्णं च मनसा कृत्वा जगृहे चार्जुनो धनुः ॥ १११ ॥
यत्पार्थिवैः क्राथसुनीथवक्रै राधेयदुर्योधनशल्यशाल्वैः ।
तदा धनुर्वेदपरैर्नृसिंहैः कृतं न सज्यं महतो ऽपि यत्नात् ॥११२॥
तदर्जुनो वीर्य्यवतां सदर्पस्तदैन्द्रिरिन्द्रावरजप्रभावः ।

[1] Jámadagnya is the son of Jamadagni, or Paraśuráma, of whom mention has been made before; who, though a Brahman, exterminated the Kshatriyas, or warrior race.

[2] Agastya is a celebrated person in Hindu legend. He is fabled to have prostrated the Vindhya mountain, as well as to have drunk the ocean dry. The traditions of the South of India ascribe to him a principal share in the formation of the Tamil language and literature; and the general tenor of the legends relating to him denotes his having been instrumental in the introduction of the Hindu religion and civilization into the Peninsula.

[3] Deva is here intended for Indra, the god of the firmament, and the father of Arjuna.

सज्जं च चक्रे निमिषान्तरेण शरांश्च जग्राह दशार्द्धसङ्ख्यान् ॥ ११३ ॥
विव्याध लक्ष्यं निपपात तच्च छिद्रेण भूमौ सहसा ऽतिविद्धम् ।
ततो ऽन्तरीक्षे च बभूव नादः समाजमध्ये च महान् निनादः ।
पुष्पाणि दिव्यानि ववर्ष देवः पार्थस्य मूर्द्ध्नि द्विषतां निहन्तुः ॥११४॥
चैलानि विव्यधुस्तत्र ब्राह्मणाश्च सहस्रशः ।
विलक्षितास्ततश्चक्रुर्हाहाकारांश्च सर्वशः
न्यपतंश्चात्र नभसः समन्तात् पुष्पवृष्टयः ॥ ११५ ॥
शताङ्गानि च तूर्य्याणि वादकाः समवादयन् ।
सूत[1]मागधसङ्घाश्च व्यस्तुवंस्तत्र सुस्वराः ॥ ११६ ॥
तं दृष्ट्वा द्रुपदः प्रीतो बभूव रिपुसूदनः ।
सह सैन्यैश्च पार्थस्य साहाय्यार्थमियेष सः ॥ ११७ ॥
तस्मिंस्तु शब्दे महति प्रवृद्धे युधिष्ठिरो धर्मभृतां वरिष्ठः ।
आवासमेवोपजगाम शीघ्रं सार्द्धं यमाभ्यां पुरुषोत्तमाभ्याम् ॥ ११८ ॥
विद्धं तु लक्ष्यं प्रसमीक्ष्य कृष्णा पार्थं च शक्रप्रतिमं निरीक्ष्य ।
आदाय शुक्लाम्बरमाल्यदाम जगाम कुन्तीसुतमुत्स्मयन्ती ॥ ११९ ॥
स तामुपादाय विजित्य रङ्गे द्विजातिभिस्तैरभिपूज्यमानः ।
रङ्गान्निरक्रामदचिन्त्यकर्म्मा पत्न्या तया चाप्यनुगम्यमानः ॥ १२० ॥

[1] Sútas and Mágadhas are professional heralds and bards.

FIFTH SECTION.

वैशम्पायन उवाच

तस्मै दित्सति कन्यां तु ब्राह्मणाय तदा नृपे ।
कोप आसीन्महीपानामालोक्यान्योन्यमन्तिकात् ॥ १२१ ॥
अस्मानयमतिक्रम्य तृणीकृत्य च सङ्गतान् ।
दातुमिच्छति विप्राय द्रौपदीं योषितां वराम् ॥ १२२ ॥
अवरोप्येह वृक्षं तु फलकाले निपात्यते ।
निहन्मैनं दुरात्मानं यो ऽयमस्मान् न मन्यते ॥ १२३ ॥
न ह्यर्हत्येष सन्मानं नापि वृद्धक्रमं गुणैः ।
हन्मैनं सह पुत्रेण दुराचारं नृपद्विषम् ॥ १२४ ॥
अयं हि सर्वानाहूय सत्कृत्य च नराधिपान् ।
गुणवद्भोजयित्वा ऽन्नं ततः पश्चान्न मन्यते ॥ १२५ ॥
अस्मिन् राजसमावाये देवानामिव सन्नये ।
किमयं सदृशं कञ्चिन्नृपतिं नैव दृष्टवान् ॥ १२६ ॥
न च विप्रेष्वधीकारो विद्यते वरणं प्रति ।
स्वयंवरः क्षत्रियाणामितीयं प्रथिता श्रुतिः ॥ १२७ ॥
अथवा यदि कन्येयं न च कञ्चिद्बुभूषति ।
अग्नावेनां प्रतिक्षिप्य याम राष्ट्राणि पार्थिवाः ॥ १२८ ॥
ब्राह्मणो यदि चापल्याल्लोभाद्वा कृतवानिदम् ।
विप्रियं पार्थिवेन्द्राणां नैष बध्यः कथञ्चन ॥ १२९ ॥

[1] Dhrishtadyumna.

ब्राह्मणार्थं हि नो राज्यं जीवितं हि वसूनि च ।
पुत्रपौत्रं च यच्चान्यदस्माकं विद्यते धनम् ॥ १३० ॥
अवमानभयाच्चैव स्वधर्मस्य च रक्षणात् ।
स्वयंवराणामन्येषां मा भूदेवंविधा गतिः ॥ १३१ ॥
इत्युक्ता राजशार्दूला हृष्टाः परिघबाहवः ।
द्रुपदं तु जिघांसन्तः सायुधाः समुपाद्रवन् ॥ १३२ ॥
तान् गृहीतशरावापान् क्रुद्धानापततो बहून् ।
द्रुपदो वीक्ष्य सन्त्रासाद्ब्राह्मणाञ्छरणं गतः ॥ १३३ ॥
वेगेनापततस्तांस्तु प्रभिन्नानिव वारणान् ।
पाण्डुपुत्रौ महेष्वासौ प्रतियातावरिन्दमौ ॥ १३४ ॥
ततः समुत्पेतुरुदायुधास्ते महीक्षितो बद्धतलाङ्गुलित्राः ।
जिघांसमानाः कुरुराजपुत्रावमर्षयन्तोऽर्जुनभीमसेनौ ॥१३५॥
ततस्तु भीमोऽद्भुतभीमकर्म्मा महाबलो वज्रसमानसारः ।
उत्पाट्य दोर्भ्यां द्रुममेकवीरो निष्पत्रयामास यथा गजेन्द्रः।१३६
तं वृक्षमादाय रिपुप्रमाथी दण्डीव दण्डं पितृराज उग्रम् ।
तस्थौ समीपे पुरुषर्षभस्य पार्थस्य पार्थः पृथुदीर्घबाहुः ॥१३७॥
तत्प्रेक्ष्य कर्मातिमनुष्यबुद्धिर्जिष्णुः स हि भ्रातुरचिन्त्यकर्म्मा ।
विसिस्मिये चापि भयं विहाय तस्थौ धनुर्गृह्य महेन्द्रकर्मा ॥१३८
तत्प्रेक्ष्य कर्मातिमनुष्यबुद्धिर्जिष्णोः सहभ्रातुरचिन्त्यकर्मा ।
दामोदरो[1] भ्रातरमुग्रवीर्य्यं हलायुधं वाक्यमिदं बभाषे ॥ १३९॥
य एष सिंहर्षभखेलगामी महद्धनुः कर्षति तालमात्रम् ।

[1] Dámodara is a name of Krishńa.

एषो ऽर्जुनो नात्र विचार्य्यमस्ति यद्यस्मि सङ्कर्षण वासुदेवः ॥१४०॥
यस्त्वेष वृक्षं तरसा ऽवभज्य राज्ञां निकारे सहसा प्रवृत्तः ।
वृकोदरान्नान्य इहैतदद्य कर्त्तुं समर्थः समरे पृथिव्याम् ॥ १४१ ॥
यो ऽसौ पुरस्तात् कमलायताक्षस्तनुर्महासिंहगतिर्विनीतः ।
गौरः प्रलम्बोज्ज्वलचारुघोणो विनिःसृतः सो ऽच्युत धर्म्मपुत्रः ॥१४२॥
यौ तौ कुमाराविव कार्त्तिकेयौ द्वावाश्विनेयाविति मे वितर्कः ।
मुक्ता हि तस्माज्जतुवेश्मदाहान्मया श्रुताः पाण्डुसुताः पृथा च ॥१४३
तमब्रवीन्निर्जलतोयदाभो हलायुधो ऽनन्तरजं प्रतीतः ।
प्रीतो ऽस्मि दृष्ट्वा हि पितृस्वसारं पृथां विमुक्तां सह कौरवाग्र्यैः ॥१४४

SIXTH SECTION.

वैशम्पायन उवाच

अजिनानि विधुन्वन्तः करकांश्च द्विजर्षभाः ।
ऊचुस्ते भीर्न कर्त्तव्या वयं योत्स्यामहे परान् ॥ १४५ ॥
तानेवं वदतो विप्रानर्जुनः प्रहसन्निव ।
उवाच प्रेक्षका भूत्वा यूयं तिष्ठथ पार्श्वतः ॥ १४६ ॥
अहमेनानजिह्माग्रैः शतशो विकिरञ्छरैः ।
वारयिष्यामि सङ्क्रुद्धान् मन्त्रैराशीविषानिव ॥ १४७ ॥

[1] The Páńdavas, with their mother, were residing in a cottage constructed of shell lac, which was privily set fire to by the agents of Duryodhana. Information of his design having been previously conveyed to the Páńdavas by Vidura, they secretly effected their escape. A general belief prevailed that they had perished in the flames.

इति तद्धनुरानम्य शुल्कावाप्तं महाबलः ।
भ्रात्रा भीमेन सहितस्तस्थौ गिरिरिवाचलः ॥ १४८ ॥
ततः कर्णमुखान् दृष्ट्वा क्षत्रियान् युद्धदुर्म्मदान् ।
सम्पेततुरभीतौ तौ गजौ प्रति गजानिव ॥ १४९ ॥
ऊचुश्च वाचः परुषास्ते राजानो युयुत्सवः ।
आहवे हि द्विजस्यापि वधो दृष्टो युयुत्सतः ॥ १५० ॥
इत्येवमुक्त्वा राजानः सहसा दुद्रुवुर्द्विजान् ।
ततः कर्णो महातेजा जिष्णुं प्रति ययौ रणे ॥ १५१ ॥
युद्धार्थी वासिताहेतोर्गजः प्रति गजं यथा ।
भीमसेनं ययौ शल्यो मद्राणामीश्वरो बली ॥ १५२ ॥
दुर्योधनादयः सर्वे ब्राह्मणैः सह सङ्गताः ।
मृदुपूर्वमयत्नेन प्रत्ययुध्यंस्तदाहवे ॥ १५३ ॥
ततोऽर्जुनः प्रत्यविध्यदापतन्तं शितैः शरैः ।
कर्णं वैकर्त्तनं श्रीमान् विकृष्य बलवद्धनुः ॥ १५४ ॥
तेषां शराणां वेगेन शितानां तिग्मतेजसाम् ।
विमुह्यमानो राधेयो यत्नात् तमनुधावति ॥ १५५ ॥
तावुभावप्यनिर्देश्यौ लाघवाज्जयतां वरौ ।
अयुध्येतां सुसंरब्धावन्योन्यविजिगीषिणौ ॥ १५६ ॥
कृते प्रतिकृतं पश्य पश्य बाहुबलं च मे ।
इति शूरार्थवचनैरभाषेतां परस्परम् ॥ १५७ ॥
ततोऽर्जुनस्य भुजयोर्वीर्य्यमप्रतिमं भुवि ।
ज्ञात्वा वैकर्त्तनः कर्णः संरब्धः समयोधयत् ॥ १५८ ॥

अर्जुनेन प्रयुक्तांस्तान् बाणान् वेगवतस्तदा ।
प्रतिहत्य ननादोच्चैः सैन्यानि तदपूजयन् ॥ १५९ ॥

कर्ण उवाच

तुष्यामि ते विप्रमुख्य भुजवीर्य्यस्य संयुगे ।
अविषादस्य चैवास्य शस्त्रास्त्रविजयस्य च ॥ १६० ॥
किं त्वं साक्षाद्धनुर्वेदो रामो वा विप्रसत्तम ।
अथ साक्षाद्धरिहयः साक्षाद्वा विष्णुरच्युतः ॥ १६१ ॥
आत्मप्रच्छादनार्थं वै बाहुवीर्य्यमपाश्रितः ।
विप्ररूपं विधायेदं मन्ये मां प्रतियुध्यसे ॥ १६२ ॥
न हि मामाहवे क्रुद्धमन्यः साक्षाच्छचीपतेः ।
पुमान् योधयितुं शक्तः पाण्डवाद्वा किरीटिनः ॥ १६३ ॥
तमेवं वादिनं तत्र फाल्गुनः प्रत्यभाषत ।
नास्मि कर्ण धनुर्वेदो नास्मि रामः प्रतापवान् ॥ १६४ ॥
ब्राह्मणोऽस्मि युधां श्रेष्ठः सर्वशस्त्रभृतां वरः ।
ब्राह्मे पौरन्दरे चास्त्रे निष्ठितो गुरुशासनात् ।
स्थितोऽस्म्यद्य रणे जेतुं त्वां वै वीर स्थिरो भव ॥ १६५ ॥

SEVENTH SECTION.

वैशम्पायन उवाच

एवमुक्तस्तु राधेयो युद्धात् कर्णो न्यवर्त्तत ।
ब्राह्मं तेजस्तदाऽजय्यं मन्यमानो महारथः ॥ १६६ ॥
अपरस्मिन् रणोद्देशे वीरौ शल्यवृकोदरौ ।
बलिनौ युद्धसम्पन्नौ विद्यया च बलेन च ॥ १६७ ॥
अन्योन्यमाह्वयन्तौ तु मत्ताविव महागजौ ।
मुष्टिभिर्जानुभिश्चैव निघ्नन्ताावितरेतरम् ॥ १६८ ॥
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ।
आचकर्षतुरन्योन्यं मुष्टिभिश्चापि जघ्नतुः ॥ १६९ ॥
ततश्चटचटाशब्दः सुघोरो ह्यभवत् तयोः ।
पाषाणसम्पातनिभैः प्रहारैरभिजघ्नतुः ॥ १७० ॥
मुहूर्त्तं तौ तदाऽन्योन्यं समरे पर्य्यकर्षताम् ।
ततो भीमः समुत्क्षिप्य बाहुभ्यां शल्यमाहवे ।
अपातयत् कुरुश्रेष्ठो ब्राह्मणा जहसुस्तदा ॥ १७१ ॥
तत्राश्चर्य्यं भीमसेनश्चकार पुरुषर्षभः ।
यच्छल्यं पातितं भूमौ नावधीद्बलिनं बली ॥ १७२ ॥
पातिते भीमसेनेन शल्ये कर्णे च शङ्किते ।
शङ्किताः सर्वराजानः परिवव्रुर्वृकोदरम् ॥ १७३ ॥
ऊचुश्च सहितास्तत्र साध्विमौ ब्राह्मणर्षभौ ।

विज्ञायेतां कुजन्मानौ कुनिवासौ तथैव च ॥ १७४ ॥
को हि राधासुतं कर्णं शक्तो योधयितुं रणे ।
अन्यत्र रामाद्द्रोणाद्वा पाण्डवाद्वा किरीटिनः ॥ १७५ ॥
कृष्णाद्वा देवकीपुत्रात् कृपाद्वाऽपि शरद्वतः ।
को वा दुर्य्योधनं शक्तः प्रतियोधयितुं रणे ॥ १७६ ॥
तथैव मद्राधिपतिं शल्यं बलवतां वरम् ।
बलदेवादृते वीरात् पाण्डवाद्वा वृकोदरात् ॥ १७७ ॥
वीराद्दुर्योधनाद्वाऽन्यः शक्तः पातयितुं रणे ।
क्रियतामवहारोऽस्माद्युद्धाद्ब्राह्मणसंवृतात् ॥ १७८ ॥
ब्राह्मणा हि सदा रक्ष्याः सापराधाऽपि नित्यदा ।
अथैनानुपलभ्येह पुनर्योत्स्याम हृष्टवत् ॥ १७९ ॥
तांस्तथावादिनः सर्वान् प्रसमीक्ष्य क्षितीश्वरान् ।
अथान्यान् पुरुषांश्चापि कृत्वा तत्कर्म्म संयुगे ॥ १८० ॥

वैशम्पायन उवाच

तत्कर्म्म भीमस्य समीक्ष्य कृष्णः कुन्तीसुतौ तौ परिशङ्कमानः ।
निवारयामास महीपतींस्तान् धर्मेण लब्धेत्यनुनीय सर्वान् ॥१८१
एवं ते विनिवृत्तास्तु युद्धाद्युद्धविशारदाः ।
यथावासं ययुः सर्वे विस्मिता राजसत्तमाः ॥ १८२ ॥
वृत्तो ब्रह्मोत्तरो रङ्गः पाञ्चाली ब्राह्मणैर्वृता ।
इति ब्रुवन्तः प्रययुर्ये तत्रासन् समागताः ॥ १८३ ॥
ब्राह्मणैस्तु प्रतिच्छन्नौ रौरवाजिनवासिभिः ।

I 2

कृच्छ्रेण जग्मतुस्तौ तु भीमसेनधनञ्जयौ ॥ १८४ ॥
विमुक्तौ जनसम्बाधाच्छत्रुभिः परिविक्षतौ ।
कृष्णयाऽनुगतौ तत्र नृवीरौ तौ विरेजतुः ।
पौर्णमास्यां घनैर्मुक्तौ चन्द्रसूर्य्याविवोदितौ ॥ १८५ ॥
तेषां माता बहुविधं विनाशं पर्य्यचिन्तयत् ।
अनागच्छत्सु पुत्रेषु भैक्ष्यकालेऽभिगच्छति ।
धार्त्तराष्ट्रैर्हता न स्युर्विज्ञाय कुरुपुङ्गवाः ॥ १८६ ॥
मायान्वितैर्वा रक्षोभिः सुघोरैर्दृढवैरिभिः ।
विपरीतं मतं जातं व्यासस्यापि महात्मनः ॥ १८७ ॥
इत्येवं चिन्तयामास सुतस्नेहावृता पृथा ।
ततः सुप्तजनप्राये दुर्द्दिने मेघसम्प्लुते ॥ १८८ ॥
महत्यथापराह्णे तु घनैः सूर्य्य इवावृतः ।
ब्राह्मणैः प्राविशत् तत्र जिष्णुर्भार्गववेश्म तत् ॥ १८९ ॥

॥ इति द्रौपदीस्वयंवरः ॥

[1] The name of the potter at whose house the Páńdavas lodged.

द्रौपदीहरणम्

FIRST SECTION.

वैशम्पायन उवाच

तस्मिन् बहुमृगेऽरण्ये अटमाना महारथाः ।
काम्यके[1] भरतश्रेष्ठा विजहुस्ते यथाऽमराः ॥ १ ॥
प्रेक्षमाणा बहुविधान् वनोद्देशान् समन्ततः ।
यथर्तुकालरम्याश्च वनराजीः सुपुष्पिताः ॥ २ ॥
पाण्डवा मृगयाशीलाश्चरन्तस्तन्महद्वनम् ।
विजहुरिन्द्रप्रतिमाः कञ्चित् कालमरिन्दम ॥ ३ ॥
ततस्ते यौगपद्येन ययुः सर्वे चतुर्दिशम् ।
मृगयां पुरुषव्याघ्रा ब्राह्मणार्थे परन्तपाः ॥ ४ ॥
द्रौपदीमाश्रमे न्यस्य तृण[2]विन्दोरनुज्ञया ।
महर्षेर्दीप्ततपसो धौम्यस्य[3] च पुरोधसः ॥ ५ ॥

[1] Kámyaka is the name of the forest in which the Páńdavas passed the time of their exile. It is sometimes described as situated on the banks of the Saraswatí river: but it must have extended more to the west, or towards the confluence of the Sutlej and the Indus.

[2] Trińavindu was originally a king, but became a *Rishi*. He was amongst the Brahmans and ascetics who had followed the Páńdavas into exile.

[3] Dhaumya is called the younger brother of Devala, also a celebrated saint, but whose parentage is variously described. Dhaumya had become the *Purohita* or family priest of the Páńdavas, at their solicitation. There is one great sage of the name, who had iron teeth; but he was a different person.

ततस्तु राजा सिन्धूनां[1] वार्द्धक्षत्रिर्[2] महायशाः ।
विवाहकामः शाल्वेयान्[3] प्रयातः सोऽभवत् तदा ॥ ६ ॥
महता परिवर्हेण राजयोग्येन संवृतः ।
राजभिर्बहुभिः सार्द्धमुपायात् काम्यकं च सः ॥ ७ ॥
तत्रापश्यत् प्रियां भार्य्यां पाण्डवानां यशस्विनीम् ।
तिष्ठन्तीमाश्रमद्वारि द्रौपदीं निर्जने वने ॥ ८ ॥
विभ्राजमानां वपुषा बिभ्रतीं रूपमुत्तमम् ।
भ्राजयन्तीं वनोद्देशं नीलाभ्रमिव विद्युतम् ॥ ९ ॥
अप्सरा देवकन्या वा माया[4] वा देवनिर्म्मिता ।
इति कृत्वाऽञ्जलिं सर्वे ददृशुस्तामनिन्दिताम् ॥ १० ॥
ततः स राजा सिन्धूनां वार्द्धक्षत्रिर्जयद्रथः ।
विस्मितस्त्वनवद्याङ्गीं दृष्ट्वा तां दुष्टमानसः ॥ ११ ॥
स कोटिकास्यं[5] राजानमब्रवीत् काममोहितः ।
कस्य त्वेषाऽनवद्याङ्गी यदि वापि न मानुषी ॥ १२ ॥

[1] The Sindhus, here put in the plural number, are the people inhabiting the countries along the Sindhu river, or Indus, from the Punjáb to the sea: and in their name we have no doubt the origin of the *Hindoi* or *Indoi* of the Greeks—the Hindus or Indians of modern times.

[2] Várddhakshatri is a patronymic, implying descendant of Vriddhakshatra, a king who is not found in the usual genealogical lists.

[3] The Śálweyas are the same as the Śálwas, who appear to be situated in the western parts of Rajputána towards Guzerat. See Vishńu Puráńa, page 177.

[4] Máyá is any illusory female form of celestial origin, created for the purpose of beguiling any individual: but Máyá Deví, or Mahámáyá, is usually applied to a form of Durgá, as a personification of the unreality of worldly things, by which our senses are imposed upon.

[5] Kotikásya—No more is known of this prince than what appears in the text. He is the son of Suratha, Rája of the Saiva tribe, and friend and follower of Jayadratha.

विवाहार्थो न मे कश्चिदिमां प्राप्यातिसुन्दरीम् ।
एतामेवाहमादाय गमिष्यामि स्वमालयम् ॥ १३ ॥
गच्छ जानीहि सौम्येनां कस्य वा ऽच कुतो ऽपि वा ।
किमर्थमागता सुभ्रूरिदं कण्टकितं वनम् ॥ १४ ॥
अपि नाम वरारोहा मामेषा लोकसुन्दरी ।
भजेदद्यायतापाङ्गी सुदती तनुमध्यमा ॥ १५ ॥
अप्यहं कृतकामः स्यामिमां प्राप्य वरस्त्रियम् ।
गच्छ जानीहि को न्वस्या नाथ इत्येव कोटिक ॥ १६ ॥
स कोटिकास्यस्तच्छ्रुत्वा रथात् प्रस्कन्द्य कुण्डली ।
उपेत्य पप्रच्छ तदा क्रोष्टा व्याघ्रवधूमिव ॥ १७ ॥

कोटिकास्य उवाच

का त्वं कदम्बस्य विनाम्य[1] शाखामेकाश्रमे तिष्ठसि शोभमाना ।
देदीप्यमाना ऽग्निशिखेव नक्तं व्याधूयमाना पवनेन सुभ्रु ॥ १८
अतीव रूपेण समन्विता त्वं न चाप्यरण्येषु बिभेषि किन्नु ।
देवी नु यक्षी[2] यदि दानवी[3] वा वराप्सरा दैत्य[3]वराङ्गना वा ॥१९॥
वपुष्मती वोरगराजकन्या वनेचरी[4] वा क्षणदाचरस्त्री[4] ।

[1] 'Having bent down, or broken off, a branch of the *Kadamba*-tree.'—What this means, is nowhere explained; but it looks as if a branch of the Kadamba-tree was used as a signal, to warn off trespassers: for when Draupadí subsequently enters into amicable conversation with Kotikásya, she lays the branch aside.

[2] The *Yakshas* are demigods, attendant upon Kuvera, the god of wealth. See the *Megha-dúta*.

[3] *Dánavas* and *Daityas* are both Titans, and hereditary foes of the gods. The former are the children of Danu, the latter of Diti, both wives of Kaśyapa.

[4] A *Vanecharí*, or female forest-goer, is the Dryad, under whose protection the wood, or

यद्येव राज्ञो वरुणस्य[1] पत्नी यमस्य[2] सोमस्य[3] धनेश्वरस्य[4] ॥ २० ॥
[5]धातुर्[6]विधातुः [7]सवितुर्विभोर्वा शक्रस्य वा त्वं सदनात् प्रपन्ना ।
न ह्येव नः पृच्छसि ये वयं स्म न चापि जानीम तवेह नाथम् ॥२१
वयं हि मानं तव वर्धयन्तः पृच्छाम भद्रे प्रभवं प्रभुं च ।
आचक्ष्व बन्धूंश्च पतिं कुलं च तत्त्वेन यच्चेह करोषि कार्य्यम् ॥२२॥
अहं तु राज्ञः सुरथस्य पुत्रो यं कोटिकास्येति विदुर्मनुष्याः ।
असौ तु यस्तिष्ठति काञ्चनाङ्गे रथे हुतोऽग्निश्चयने यथैव ॥२३॥
[8]त्रिगर्त्तराज्ञः कमलायताक्षः क्षेमङ्करो[8] नाम स एष वीरः ।

or any part of it, may be. The *Kshańadáchara*, or night-walker, is a spirit of ill; but he has good taste in the matter of a wife: or, at least, as these beings can assume various shapes, we may conclude that the females are fond of appearing to advantage.

[1] Varuńa is the deity of the sea. His wife is Váruńí, who is the goddess of wine.

[2] Yama is the son of the sun, and regent of the infernal regions. He combines the offices of Pluto and Rhadamanthus; for he is the judge of the dead, and the souls of both good and wicked appear before his tribunal. The former he despatches to Swarga, or Elysium; the latter to Naraka, or Tartarus. He married his sister Yamuná, the Yamuná or Jumna river personified.

——In Saturn's reign
Such mixture was not held a stain.

[3] Soma is the deity of the moon. His favourite wife was the constellation Rohiní.

[4] Dhaneśwara is the god of wealth, or Kuvera. His wife is of no particular celebrity; and is merely his personified *Śakti* or power, named, after him, Kauverí.

[5] Dhátri is a name of Brahmá, whose wife Saraswatí is the goddess of literature and the arts.

[6] Vidhátri is usually applied to Brahmá also; but in this place it designates either Śiva or Kaśyapa. The wife of the former is Párvatí; of the latter, Aditi.

[7] Savitri is the sun, whose wife was Savarńá. Vibhu is here used for Vishńu, whose wife is Lakshmí, the goddess of beauty and prosperity.

[8] Trigartta, the country of the three strongholds, has been recently determined to be the modern hill state of *Kotoch*, which is still called by the people *Traigartt-ka-mulk*. Its prince, Kshemankara, does notappear in the genealogical lists.

अस्मात् परस्त्वेष महाधनुष्मान् पुत्रः कुलिन्दा[1]धिपतेर्वरिष्ठः ॥२४
निरीक्षते त्वां विपुलायताक्षः सुपुष्पितः पर्वतवासनित्यः ।
असौ तु यः पुष्करिणीसमीपे श्यामो युवा तिष्ठति दर्शनीयः ॥२५
इक्ष्वा[2]कुराज्ञः सुबलस्य पुत्रः स एष हन्ता द्विषतां सुगात्रि ।
यस्यानुयात्रा ध्वजिनः प्रयान्ति सौवीरका द्वादश राजपुत्राः ॥२६
शोणाश्वयुक्तेषु रथेषु सर्वे मखेषु दीप्ता इव हव्यवाहाः ।
अङ्गारकः कुञ्जरो गुप्तकश्च शत्रुञ्जयः सृञ्जयसुप्रवृद्धौ ॥ २७ ॥
भयङ्करो ऽथ भ्रमरो रविश्च शूरः प्रतापः कुहनश्च नाम ।
यं षट्सहस्रा रथिनो ऽनुयान्ति नागा हयाश्चैव पदातिनश्च ॥२८
जयद्रथो नाम यदि श्रुतस्ते सौ[3]वीरराजः सुभगे स एषः
तस्यापरे भ्रातरो ऽदीनसत्त्वा वलाहकानीकविदारणाद्याः ॥२९॥
सौवीरवीराः प्रवरा युवानो राजानमेते बलिनो ऽनुयान्ति ।
एतैः सहायैरुपयाति राजा मरुद्गणैरिन्द्र इवाभिगुप्तः ।

[1] Kulindas. These are enumerated elsewhere amongst the people in the north-west, and, as appears from the context, are mountaineers. They were probably neighbours of the Traigarttas.

[2] Ikshwáku was the son of the Manu Vaivaswata, the son of the sun, and is regarded as the founder of the solar dynasty. The great families of ancient India were distinguished as *Súrya-vanśas,* and *Soma-vanśas,* according as they derived their lineage from the sun or the moon. The pretension is not yet laid aside. The Ránas of Udaypur claim to be members of the Súrya-vanśa ; whilst the Jharejas of Cutch and Sindh, as branches of the Yadu family, are still the representatives of the lunar race.

[3] The Sauvíras, although applied here to a particular family, denote, as is subsequently shewn, a tribe or people, either identical, or closely connected with the Sindhus ; for Jayadratha is indifferently termed Raja of the Sindhus or Saindhavas, and Raja of the Sauvíras. They are sometimes named in concert as Sindhu-sauvíras ; and, whether the same as the dwellers on the Indus or a kindred tribe, must have occupied much the same territory—the western and southern portion of the Punjab.

अजानतां ख्यापय नः सुकेशि कस्यासि भार्य्या दुहिता च कस्य ।३०

वैशम्पायन उवाच

अथाब्रवीद्द्रौपदी राजपुत्री पृष्टा शिवीनां[1] प्रवरेण तेन ।
अवेक्ष्य मन्दं प्रविमुच्य शाखां सङ्गृह्णती कौशिकमुत्तरीयम् ॥३१
बुद्ध्या ऽभिजानामि नरेन्द्रपुत्र न मादृशी त्वामभिभाष्टुमर्हति ।
न त्वेव वक्ता ऽस्ति तवेह वाक्यमन्यो नरो वाप्यथ वापि नारी॥३२
एका ह्यहं सम्प्रति तेन वाचं ददानि वै भद्र निबोध चेदम् ।
अहं ह्यरण्ये कथमेकमेका त्वामालपेयं निरता स्वधर्मे ॥ ३३ ॥
जानामि च त्वां सुरथस्य पुत्रं यं कोटिकास्येति विदुर्मनुष्याः ।
तस्मादहं शैव्य तथैव तुभ्यमाख्यामि बन्धून् प्रथितं कुलं च ॥३४
अपत्यमस्मि द्रुपदस्य राज्ञः कृष्णेति मां शैव्य विदुर्मनुष्याः ।
सा ऽहं वृणे पञ्च[2] जनान् पतित्वे ये खाण्डवप्रस्थगताः श्रुतास्ते॥३५

[1] By 'chief of the Śivis,' we learn that Kotikásya, or rather his father Suratha, was the prince of a tribe, of whom mention is made by the historians of Alexander's Indian conquests. "After reaching the confluence of the Acesines with the Hydaspes, Alexander made a retrograde march towards the Indus, upon an incursion against the Sibæ; who, from being clothed with skins, and armed with clubs, the latter of which they stamped upon their cattle, the Greeks fancied to be descendants of Hercules." They are said to have been the posterity of king Śivi; but the name and the practices of the people most probably allude to their especial worship of Śiva.

[2] The strange circumstance of Draupadí being what Sir Wm. Jones calls a 'five-maled single-femaled flower' (see his Enchanted Fruit), is accounted for by a tale told at the end of the *Swayamvara*. When the Páńdavas returned home, they took Draupadí with them, although the marriage was not yet solemnized. As they entered, they exclaimed to their mother, 'We have brought *bhikshá*,—alms.' Without looking at them, Kuntí replied: 'Share it amongst you!' And however horrified she was when she discovered her mistake, it was agreed between her and her sons, that her words could not be falsified, and that

Draupadí

युधिष्ठिरो भीमसेनार्जुनौ च माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
ते मां निवेश्येह दिशश्चतस्रो विभज्य पार्था मृगयां प्रयाताः ॥३६
प्राचीं राजा दक्षिणां भीमसेनो जयः[1] प्रतीचीं यमजावुदीचीम् ।
मन्ये तु तेषां रथसत्तमानां कालोऽभितः प्राप्त इहोपयातुम् ॥३७
सम्मानिता यास्यथ तैर्यथेष्टं विमुच्य वाहानवरोहयध्वम् ।
प्रियातिथिर्धर्मसुतो महात्मा प्रीतो भविष्यत्यभिवीक्ष्य युष्मान् ।३८

Draupadí must be the wife of all the brothers. When this is announced to king Drupada, he expostulates against it; upon which Yudhishthira makes this very remarkable observation: 'We pretend not to determine what is proper: we follow the path successively trodden by those who have gone before.' *Púrveshám ánupúrvyena yátam vartmánuyámahe.* Drupada being still dissatisfied, Vyása is sent for, who relates to the king a legend, which shews that the five Páńdavas were formerly five Indras, who dwelt in a cave in the Himálaya mountains, and whose common bride Lakshmí, or regal fortune, is now born as Draupadí. It is worthy of notice, however, that this story begins in a manner so little likely to lead to the catastrophe, that there can be no doubt there is a hiatus in the narrative: for it is introduced by an account of a great sacrifice celebrated by Súrya, at which Yama being present, his duty as destroyer of living beings is neglected, and the gods complain to Brahmá that men multiply inconveniently fast. There it stops; and it is not shewn how the evil is to be remedied: but if the story were entire, it would probably end in the institution of many husbands to one wife, as a very effective Malthusian device for limiting population within the means of subsistence. At any rate, we may infer that the practice preceded the time of the Páńdavas, and that it was brought by them from the Himálaya, where it still prevails. Amongst the Bhotias, a family of brothers has a wife in common; and we can scarcely question the object of the arrangement, when the unproductive region which these people occupy is recollected. It is not unlikely that the same motive, that of insufficient food, may have led to the prevalence of the same usage amongst the Nomadic Scythians, amongst whom we know, from Herodotus, that it existed in very early times. What led to its adoption by the Nair tribe in Malabar it is not so easy to conjecture: but there are vestiges of a connexion between them and the people of the Himalaya, which, although very obscure, intimate a possibility that the Nairs may have come from the mountains, and brought the practice with them. At present, its object seems to be to preserve the purity of descent, which it is thought is more secure on the female than on the male side: and, accordingly, the child claims property, or even the *Raj*, not through his father, but his mother.

[1] Jaya, a name of Arjuna. A bold metonymy; not merely Victor, but Victory.

एतावदुक्त्वा द्रुपदात्मजा सा शैव्यात्मजं चन्द्रमुखी प्रतीता ।
विवेश तां पर्णशालां प्रशस्तां सञ्चिन्त्य तेषामतिथित्वधर्मम् ॥३९

SECOND SECTION.

वैशम्पायन उवाच

तथासीनेषु सर्वेषु तेषु राजसु भारत ।
यदुक्तं कृष्णया सार्द्धं तत्सर्वं प्रत्यवेदयत् ॥ ४० ॥
कोटिकास्यवचः श्रुत्वा शैव्यं सौवीरकोऽब्रवीत् ।
यदा वाचं व्याहरन्त्यामस्यां मे रमते मनः ॥ ४१ ॥
सीमन्तिनीनां मुख्यायां विनिवृत्तः कथं भवान् ।
एतां दृष्ट्वा स्त्रियो मेऽन्या यथा शाखामृगस्त्रियः ॥ ४२ ॥
प्रतिभान्ति महाबाहो सत्यमेतद्ब्रवीमि ते ।
दर्शनादेव हि मनस्तया मेऽपहृतं भृशम् ॥ ४३ ॥
तां समाचक्ष्व कल्याणीं यदि स्यात् शैव्य मानुषी ।

कोटिक उवाच

एषा वै द्रौपदी कृष्णा राजपुत्री यशस्विनी ॥ ४४ ॥
पञ्चानां पाण्डुपुत्राणां महिषी सम्मता भृशम्

सर्वेषां चैव पार्थानां प्रिया बहुमता सती ।
तया समेत्य सौवीर सौवीराभिमुखो व्रज ॥ ४५ ॥

वैशम्पायन उवाच

एवमुक्तः प्रत्युवाच पश्यामि द्रौपदीमिति ।
पतिः सौवीरसिन्धूनां दुष्टभावो जयद्रथः ॥ ४६ ॥
स प्रविश्याश्रमं पुण्यं सिंहगोष्ठं वृको यथा ।
आत्मना सप्तमः[1] कृष्णामिदं वचनमब्रवीत् ॥ ४७ ॥
कुशलं ते वरारोहे भर्त्तारस्ते ऽप्यनामयाः ।
येषां कुशलकामा ऽसि ते ऽपि कच्चिदनामयाः ॥ ४८ ॥

द्रौपद्युवाच

अपि ते कुशलं राज्ये राष्ट्रे कोषे बले तथा ।
कच्चिदेकः शिवीनाढ्यान् सौवीरान् सह सिन्धुभिः ।
अनुतिष्ठसि धर्मेण ये चान्ये विदितास्त्वया ॥ ४९ ॥
कौरव्यः कुशली राजा कुन्तीपुत्रो युधिष्ठिरः ।
अहं च भ्रातरश्चास्य यांश्चान्यान् परिपृच्छसि ॥ ५० ॥
पाद्यं प्रतिगृहाणेदमासनं च नृपात्मज ।
मृगान् पञ्चशतं[2] चैव प्रातराशं ददानि ते ॥ ५१ ॥

[1] Jayadratha, it seems, was accompanied by six brothers, the names of some of whom are mentioned in verse 29.

[2] 'Five hundred deer &c. for breakfast'! Whence was Draupadí to procure all this good cheer? The mystery is explained, by reference to a passage in the beginning of the Vana

ऐणेयान् पृषतान् न्यङ्कून् हरिणान् शरभान् शशान् ।
ऋक्षान् रुरून् शम्बरांश्च गवयांश्च मृगान् बहून् ॥ ५२ ॥
वराहान् महिषांश्चैव याश्चान्या मृगजातयः ।
प्रदास्यति स्वयं तुभ्यं कुन्तीपुत्रो युधिष्ठिरः ॥ ५३ ॥

जयद्रथ उवाच

कुशलं प्रातराशस्य सर्वं मे दित्सितं त्वया ।
एहि मे रथमारोह सुखमाप्नुहि केवलम् ॥ ५४ ॥
गतश्रीकान् हृतराज्यान् कृपणान् गतचेतसः ।
अरण्यवासिनः पार्थान् नानुरोद्धुं त्वमर्हसि ॥ ५५ ॥
न वै प्राज्ञा गतश्रीकं भर्त्तारमुपयुञ्जते ।
युञ्जानमनुयुञ्जीत न श्रियः सङ्क्षये वसेत् ॥ ५६ ॥
श्रिया विहीना राष्ट्राच्च विनष्टाः शाश्वतीः समाः ।
अलं ते पाण्डुपुत्राणां भक्त्या क्लेशमुपासितुम् ॥ ५७ ॥
भार्य्या मे भव सुश्रोणि त्यजैतान् सुखमाप्नुहि ।
अखिलान् सिन्धुसौवीरानाप्नुहि त्वं मया सह ॥ ५८ ॥

Vana Parva. When the Páńdavas repaired to the forest, they were followed by a number of Brahmans who adhered to their party. Yudhishthira endeavoured to persuade them to return, alleging the impossibility of his feeding them, and the sin he should incur if they were starved. As they persisted in their purpose, Yudhishthira was advised by Dhaumya to have recourse to the Sun as the source of all sustenance. He accordingly worshipped Súrya, who appeared to him, and gave him a copper cauldron, which he told the prince should be filled with fruits, roots, potherbs, and even flesh, ready dressed, whenever food was wanted, until the exile of the Páńdavas should terminate. With such an inexhaustible larder, Draupadí was able to entertain the followers of Jayadratha.

वैशम्पायन उवाच

इत्युक्त्वा सिन्धुराजेन वाक्यं हृदयकम्पनम् ।
कृष्णा तस्मादपाक्रामद्देशात् सभृकुटीमुखी ॥ ५९ ॥
अवमत्यास्य तद्वाक्यमाक्षिप्य च सुमध्यमा ।
मैवमित्यब्रवीत् कृष्णा लज्जस्वेति च सैन्धवम् ॥ ६० ॥
सा काङ्क्षमाणा भर्तॄणामुपयातमनिन्दिता ।
विलोभयामास परं वाक्यैर्वाक्यानि युञ्जती ॥ ६१ ॥

THIRD SECTION.

वैशम्पायन उवाच

सरोषरागोपहतेन वल्गुना सरागनेत्रेण नतोन्नतभ्रुवा ।
मुखेन विस्फुर्य्य सुवीरराष्ट्रपं ततोऽब्रवीत् तं द्रुपदात्मजा पुनः ॥६२॥
यशस्विनस्तीक्ष्णविषान् महारथानतिब्रुवन् मूढ न लज्जसे कथम् ।
महेन्द्रकल्पान् निरतान् स्वकर्मसु स्थितान् समूहेष्वपि यक्षरक्षसाम्।६३
न किञ्चिदीड्यं प्रवदन्ति पापं वनेचरं वा गृहमेधिनं वा ।
तपस्विनं सम्परिपूर्णविद्यं भषन्ति हैवं श्वनराः सुवीर ॥ ६४ ॥
अहं तु मन्ये तव नास्ति कश्चिदेतादृशे क्षत्रियसन्निवेशे ।
यस्त्वाद्य पातालमुखे पतन्तं पाणौ गृहीत्वा प्रतिसंहरेत ॥ ६५ ॥
नागं प्रभिन्नं गिरिकूटकल्पमुपत्यकां हैमवतीं चरन्तम् ।

दण्डीव यूथानपसेधसे त्वं यो जेतुमाशंससि धर्मराजम् ॥ ६६ ॥
बाल्यात् प्रसुप्तस्य महाबलस्य सिंहस्य पक्ष्माणि मुखाल्लुनासि ।
पदा समाहत्य पलायमानः क्रुद्धं यदा द्रक्ष्यसि भीमसेनम् ॥ ६७ ॥
महाबलं घोरतरं प्रवृद्धं जातं हरिं पर्वतकन्दरेषु ।
प्रसुप्तमुग्रं प्रपदेन हंसि यः क्रुद्धमायोत्स्यसि जिष्णुमुग्रम् ॥ ६८ ॥
कृष्णोरगौ तीक्ष्णमुखौ द्विजिह्वौ मत्तः पदा क्रामसि पुच्छदेशे ।
यः पाण्डवाभ्यां पुरुषोत्तमाभ्यां जघन्यजाभ्यां प्रयुयुत्ससे त्वम् ॥ ६९ ॥
यथा च वेणुः कदली नलो वा फलत्यभावाय न भूतयेत्मनः ।
तथैव मां तैः परिरक्ष्यमाणामादास्यसे कर्कटीव[1] गर्भम् ॥ ७० ॥

जयद्रथ उवाच

जानामि कृष्णे विदितं मयैतद्यथाविधास्ते नरदेवपुत्राः ।
न त्वेवमेतेन विभीषणेन शक्या वयं त्रासयितुं त्वयाऽद्य ॥ ७१ ॥
वयं पुनः सप्तदशेषु[2] कृष्णे कुलेषु सर्वेऽनवमेषु जाताः ।
षड्भ्यो[3] गुणेभ्योऽभ्यधिका विहीनान् मन्यामहे द्रौपदि पाण्डुपुत्रान्।७२
सा क्षिप्रमातिष्ठ गजं रथं वा न वाक्यमात्रेण वयं हि शक्याः

[1] It is a popular superstition that the female crab dies upon depositing her young.

[2] *Saptadaśeshu Kuleshu.* The term seventeen is here an epithet, meaning, 'having the seventeen properties of royalty.' These are, eight *Sandhánas*, collections of wealth, and nine *Śaktis*, or powers of administration. The first are revenue from agriculture or land-tax; from trade or customs; from tolls at mountain-passes, or at bridges or ferries; taxes on elephant-catching; upon mines; escheats or appropriation of unclaimed property, and general accumulation of treasure. The nine Śaktis are, the power of the king; of his ministers; and of their joint activity: the threefold objects to be accomplished by them severally, and the triple prosperity that attends their successful employment.

[3] The six *Guńas* or qualities of a king are, valour, energy, firmness, ability, liberality, and majesty.

आशंस वा त्वं कृपणं वदन्ती सौवीरराजस्य पुनः प्रसादम् ॥ ७३ ॥

द्रौपद्युवाच

महाबला किन्त्विह दुर्बलेव सौवीरराजस्य मताऽहमस्मि ।
नाहं प्रमाथादिह सम्प्रतीता सौवीरराजं कृपणं वदेयम् ॥ ७४ ॥
यस्या हि कृष्णौ पदवीं चरेतां समास्थितावेकरथे समेतौ ।
इन्द्रोऽपि तां नापहरेत् कथञ्चिन्मनुष्यमात्रः कृपणः कुतोऽन्यः ॥७५॥
यथा किरीटी परवीरघाती निघ्नन् रथस्थो द्विषतां मनांसि ।
मदन्तरे त्वद्ध्वजिनीं प्रवेष्टा कक्षं दहन्नग्निरिवोष्णगेषु ॥ ७६ ॥
जनार्दनः सान्धकवृष्णिवीरो महेष्वासाः कैकेयाश्चापि सर्वे ।
एते हि सर्वे मम राजपुत्राः प्रहृष्टरूपाः पदवीं चरेयुः ॥ ७७ ॥
मौर्वीविसृष्टा स्तनयित्नुघोषा गाण्डीवमुक्तास्त्वतिवेगवन्तः ।
हस्तं समाहत्य धनञ्जयस्य भीमाः शब्दं घोरतरं नदन्ति ॥ ७८ ॥
गाण्डीवमुक्तांश्च महाशरौघान् पतङ्गसङ्घानिव शीघ्रवेगान् ।
यदा द्रक्ष्यस्यर्जुनं वीर्य्यशालिनं तदा स्वबुद्धिं प्रतिनिन्दितासि ॥७९॥
सशङ्खघोषः सतलत्रघोषो गाण्डीवधन्वा मुहुरुद्वहंश्च ।
यदा शरानर्पयिता तवोरसि तदा मनस्ते किमिवाभविष्यत् ॥ ८० ॥
गदाहस्तं भीममभिद्रवन्तं माद्रीपुत्रौ सम्पतन्तौ दिशश्च ।
अमर्षजं क्रोधविषं वमन्तौ दृष्ट्वा चिरं तापमुपैष्यसेऽधम ॥ ८१ ॥
यथा चाहं नातिचरे कथञ्चित् पतीन् महार्हान् मनसाऽपि जातु ।
तेनाद्य सत्येन वशीकृतं त्वां द्रष्टास्मि पार्थैः परिकृष्यमाणम् ॥८२॥
न सम्भ्रमं गन्तुमहं हि शक्ष्ये त्वया नृशंसेन विकृष्यमाणा ।

समागताऽहं हि कुरुप्रवीरैः पुनर्वनं काम्यकमागताऽस्मि ॥ ८३ ॥

वैशम्पायन उवाच

साताननुप्रेक्ष्य विशालनेत्रा जिघृक्षमाणानवभर्त्सयन्ती ।
प्रोवाच मा मा स्पृशतेति भीता धौम्यं प्रचुक्रोश पुरोहितं सा ॥ ८४ ॥
जग्राह तामुत्तरवस्त्रदेशे जयद्रथस्तं समवाक्षिपत् सा ।
तया समाक्षिप्ततनुः स पापः पपात शाखीव निकृत्तमूलः ॥ ८५ ॥
प्रगृह्यमाणा तु महाजवेन मुहुर्विनिश्वस्य च राजपुत्री ।
सा कृष्यमाणा रथमारुरोह धौम्यस्य पादावभिवाद्य कृष्णा ॥ ८६ ॥

धौम्य उवाच

नेयं शक्या त्वया नेतुमविजित्य महारथान् ।
धर्मं क्षत्रस्य पौराणमवेक्षस्व जयद्रथ ॥ ८७ ॥
क्षुद्रं कृत्वा फलं पापं त्वं प्राप्स्यसि न संशयः ।
आसाद्य पाण्डवान् वीरान् धर्मराजपुरोगमान् ॥ ८८ ॥

वैशम्पायन उवाच

इत्युक्त्वा ह्रियमाणां तां राजपुत्रीं यशस्विनीम् ।
अन्वगच्छत् तदा धौम्यः पदातिगणमध्यगः ॥ ८९ ॥

FOURTH SECTION.

वैशम्पायन उवाच

ततो दिशः सम्प्रविहृत्य पार्था मृगान् वराहान् महिषांश्च हत्वा ।
धनुर्धराः श्रेष्ठतमाः पृथिव्यां पृथक् चरन्तः सहिता बभूवुः ॥ ९० ॥
ततो मृगव्यालगणानुकीर्णं महावनं तद् विहगोपघुष्टम् ।
भ्रातॄंश्च तानभ्यवदद्युधिष्ठिरः श्रुत्वा गिरो व्याहरतां मृगाणाम् ॥९१॥
आदित्यदीप्तां दिशमभ्युपेत्य मृगा द्विजाः क्रूरमिमे वदन्ति ।
आयासमुग्रं प्रतिवेदयन्तो महावनं शत्रुभिर्बाध्यमानम् ॥ ९२ ॥
क्षिप्रं निवर्त्तध्वमलं मृगैर्नो मनो हि मे दूयति दह्यते च ।
बुद्धिं समाच्छाद्य च मे समन्युरुद्धूयते प्राणपतिः शरीरे ॥ ७३ ॥
सरः सुपर्णेन हृतोरगं यथा राष्ट्रं यथा ऽराजकमात्तलक्ष्मि ।
एवंविधं मे प्रतिभाति काम्यकं शौण्डैर्यथा पीतरसश्च कुम्भः ॥ ९४ ॥
ते सै[1]न्धवैरत्यनिलोग्रवेगैर्महाजवैर्वाजिभिरुह्यमानाः ।
युक्तैर्बृहद्भिः सुरथैर्नृवीरास्तदाश्रमायाभिमुखा बभूवुः ॥ ९५ ॥
तेषां तु गोमायुरनल्पघोषो निवर्त्ततां वाममुपेत्य पार्श्वम् ।
प्रव्याहरत् तत् प्रविमृश्य राजा प्रोवाच भीमं च धनञ्जयं च ॥ ९६ ॥
यथा वदत्येष विहीनयोनिः शालावृको वा समुपेत्य पार्श्वम् ।

[1] The west of India was formerly famous for its breed of horses; and there is still a powerful though vicious breed in Cutch and Guzerat.

सुव्यक्तमस्मानवमन्य पापैः कृतो ऽभिमर्दः कुरुभिः प्रसह्य ॥ ९७ ॥
इत्येव ते तद्वनमाविशन्तो महत्यरण्ये मृगयां चरित्वा ।
बालामपश्यन्त तदा रुदन्तीं धात्रेयिकां प्रेष्यवधूं प्रियायाः ॥ ९८ ॥
तामिन्द्रसेनस्त्वरितो[1] ऽभिसृत्य रथादवप्लुत्य ततो ऽभ्यधावत् ।
प्रोवाच चैनां वचनं नरेन्द्र धात्रेयिकामार्त्ततरस्तदानीम् ॥ ९९ ॥
किं रोदिषि त्वं पतिता धरण्यां किं ते मुखं शुष्यति दीनवर्णम् ।
कच्चिन्न पापैः सुनृशंसकृद्भिः प्रमाथिता द्रौपदी राजपुत्री ॥ १०० ॥
अचिन्त्यरूपा सुविशालनेत्रा शरीरतुल्या कुरुपुङ्गवानाम् ।
यद्येव देवी पृथिवीं प्रविष्टा दिवं प्रपन्ना ऽप्यथवा समुद्रम् ॥ १०१ ॥
तस्या गमिष्यन्ति पदं हि पार्था यथा हि सन्तप्यति धर्मपुत्रः ।
को हीदृशानामरिमर्दनानां क्लेशक्षमाणामपराजितानाम् ॥ १०२ ॥
प्राणैः समामिष्टतमां जिहीर्षेदनुत्तमं रत्नमिव प्रमूढः ।
न बुध्यते नाथवतीमिहाद्य बहिश्चरं हृदयं पाण्डवानाम् ॥ १०३ ॥
कस्याद्य कायं प्रतिभिद्य घोरा महीं प्रवेक्ष्यन्ति शिताः शराग्र्याः ।
मा त्वं शुचस्तां प्रति भीरु विद्धि यथा ऽद्य कृष्णा पुनरेष्यतीति ॥ १०४ ॥
निहत्य सर्वान् द्विषतः समग्रान् पार्थाः समेष्यन्त्यथ याज्ञसेन्या ।
अथाब्रवीच्चारुमुखं विमृश्य धात्रेयिका सारथिमिन्द्रसेनम् ॥ १०५ ॥
जयद्रथेनापहृता प्रमथ्य पञ्चेन्द्रकल्पान् परिभूय कृष्णा ।
तिष्ठन्ति वर्त्मानि नवान्यमूनि वृक्षाश्च न म्लान्ति तथैव भग्नाः ॥ १०६ ॥
आवर्त्तयध्वं ह्यनुयात शीघ्रं न दूरयातैव हि राजपुत्री ।
सन्नह्यध्वं सर्व एवेन्द्रकल्पा महान्ति चारूणि च दंशनानि ॥ १०७ ॥

[1] Indrasena is the charioteer of Yudhishṭhira.

गृह्णीत चापानि महाधनानि शरांश्च शीघ्रं पदवीं चरध्वम् ।
पुरा हि निर्भर्त्सनदण्डमोहिता प्रमोहचित्ता वदनेन शुष्यता ॥ १०८ ॥
ददाति कस्मैचिदनर्हते तनुं वराज्यपूर्णामिव भस्मनि स्रुचम् ।
पुरा तुषाग्नाविव हूयते हविः पुरा श्मशाने स्रगिवापविध्यते ॥ १०९ ॥
पुरा च सोमोऽध्वरगोऽवलिह्यते शुना यथा विप्रजने प्रमोहिते ।
महत्यरण्ये मृगयां चरित्वा पुरा शृगालो नलिनीं विगाहते ॥ ११० ॥
मा वः प्रियायाः सुनसं सुलोचनं चन्द्रप्रभावं वदनं प्रसन्नम् ।
स्पृश्याच्छुभं कश्चिदकृत्यकारी श्वा वै पुरोडाशमिवाध्वरस्थम् ।
एतानि वर्त्मान्यनुयात शीघ्रं मा वः कालः क्षिप्रमिहात्यगाद्वै ॥ १११ ॥

युधिष्ठिर उवाच

भद्रे प्रतिक्राम नियच्छ वाचं माऽस्मत्सकाशे परुषाण्यवोचः ।
राजानो वा यदि वा राजपुत्रा बलेन मत्ता वञ्चनां प्राप्नुवन्ति ॥ ११२ ॥

वैशम्पायन उवाच

एतावदुक्त्वा प्रययुर्हि शीघ्रं तान्येव वर्त्मान्यनुवर्त्तमानाः ।
मुहुर्मुहुर्व्यालवदुच्छ्वसन्तो ज्या विक्षिपन्तश्च महाधनुर्भ्यः ॥ ११३ ॥
ततोऽपश्यंस्तस्य सैन्यस्य रेणुमुद्धूतं वै वाजिखुरप्रणुन्नम् ।
पदातीनां मध्यगतं च धौम्यं विक्रोशन्तं भीममभिद्रवेति ॥ ११४ ॥
ते सान्त्व्य धौम्यं परिदीनसत्त्वाः सुखं भवानेत्विति राजपुत्राः ।
श्येना यथैवामिषसम्प्रयुक्ता जवेन तत्सैन्यमथाभ्यधावन् ॥ ११५ ॥
तेषां महेन्द्रोपमविक्रमाणां संरब्धानां धर्षणाद्याज्ञसेन्याः ।

क्रोधः प्रजज्वाल जयद्रथं च दृष्ट्वा प्रियां तस्य रथे स्थितां च ॥ ११६ ॥
प्रचुक्रुशुश्चाप्यथ सिन्धुराजं वृकोदरश्चैव धनञ्जयश्च ।
यमौ च राजा च महाधनुर्धरास्ततो दिशः सम्मुमुहः परेषाम् ॥११७॥

FIFTH SECTION.

वैशम्पायन उवाच

ततो घोरतरः शब्दो वने समभवत् तदा ।
भीमसेनार्जुनौ दृष्ट्वा क्षत्रियाणाममर्षिणाम् ॥ ११८ ॥
तेषां ध्वजाग्राण्यभिवीक्ष्य राजा स्वयं दुरात्मा कुरुपुङ्गवानाम् ।
जयद्रथो याज्ञसेनीमुवाच रथे स्थितां भानुमतीं हतौजाः ॥ ११९ ॥
आयान्तीमे पञ्च रथा महान्तो मन्ये च कृष्णे पतयस्तवैते ।
सा जानती ख्यापय नः सुकेशि परं परं पाण्डवानां रथस्थम् ॥ १२० ॥

द्रौपद्युवाच

किं ते ज्ञातैर्मूढ महाधनुर्धैरनायुष्यं कर्म्म कृत्वाऽतिघोरम् ।
एते वीराः पतयो मे समेता न वः शेषः कश्चिदिहास्ति युद्धे ॥१२१॥
आख्यातव्यं त्वेव सर्वं मुमूर्षो मया तुभ्यं पृष्टया धर्म एषः ।
न मे व्यथा विद्यते त्वद्भयं वा सम्पश्यन्त्याः सानुजं धर्मराजम् ॥ १२२ ॥

यस्य ध्वजाग्रे नदतो मृदङ्गौ नन्दोपनन्दौ मधुरौ युक्तरूपौ ।
एतं स्वधर्मार्थविनिश्चयज्ञं सदा जनाः कृत्यवन्तोऽनुयान्ति ॥ १२३ ॥
य एष जाम्बूनदशुद्धगौरः प्रचण्डघोणस्तनुरायताक्षः ।
एनं कुरुश्रेष्ठतमं वदन्ति युधिष्ठिरं धर्मसुतं पतिं मे ॥ १२४ ॥
अप्येष शत्रोः शरणागतस्य दद्यात् प्राणान् धर्मचारी नृवीरः ।
परैह्येनं मूढ जवेन भूतये त्वमात्मनः प्राञ्जलिर्न्यस्तशस्त्रः ॥ १२५ ॥
अथाप्येनं पश्यसि यं रथस्थं महाभुजं शालमिव प्रवृद्धम् ।
सन्दष्टौष्ठं भ्रुकुटीसंहतभ्रुवं वृकोदरो नाम पतिर्ममैषः ॥ १२६ ॥
आजानेया बलिनः साधुदान्ता महाबलाः शूरमुदावहन्ति ।
एतस्य कर्माण्यतिमानुषाणि भीमेतिशब्दोऽस्य गतः पृथिव्याम् ।१२७
नास्यापराद्धाः शेषमवाप्नुवन्ति नायं वैरं विस्मरते कदाचित् ।
वैरस्यान्तं संविधायोपयाति पश्चाच्छान्तिं न च गच्छत्यतीव ॥१२८॥
धनुर्धराग्र्यो धृतिमान् यशस्वी जितेन्द्रियो वृद्धसेवी नृवीरः ।
भ्राता च शिष्यश्च युधिष्ठिरस्य धनञ्जयो नाम पतिर्ममैषः ॥ १२९ ॥
यो वै न कामान्न भयान्न लोभात् त्यजेद्धर्मं न नृशंस्यं च कुर्यात् ।
स एष वैश्वानरतुल्यतेजाः कुन्तीसुतः शत्रुसहः प्रमाथी ॥ १३० ॥
यः सर्वधर्मार्थविनिश्चयज्ञो भयार्त्तानां भयहर्त्ता मनीषी ।
यस्योत्तमं रूपमाहुः पृथिव्यां यं पाण्डवाः परिरक्षन्ति सर्वे ॥ १३१ ॥

[1] The banners of the Hindu princes were, and are still distinguished by a sort of armorial bearing. In ancient times, these appear to have been sometimes substantial objects, as in the present case, in which Yudhishthira seems to have borne two small drums, to which names are given in the text, at either end of a cross-bar. The banner of Arjuna bore a painted representation of the monkey Hanumán, which was the device exhibited upou the flag of the Raja of Bhurtpore when taken by Lord Combermere.

प्राणैर्गरीयांसमनुव्रतं वै स एष वीरो नकुलः पतिर्मे ।
यः खड्गयोधी लघुचित्रहस्तो महांश्च धीमान् सहदेवो द्वितीयः॥१३२॥
यस्याद्य कर्म्म द्रक्ष्यसे मूढसत्त्व शतक्रतोर्वा दैत्यसेनासु सङ्ख्ये ।
शूरः कृतास्त्रो मतिमान् मनस्वी प्रियङ्करो धर्मसुतस्य राज्ञः ॥ १३३ ॥
य एष चन्द्रार्कसमानतेजा जघन्यजः पाण्डवानां प्रियश्च ।
बुद्ध्या समो यस्य नरो न विद्यते वक्ता तथा सत्सु विनिश्चयज्ञः ॥१३४॥
स एष शूरो नित्यममर्षणश्च धीमान् प्राज्ञः सहदेवः पतिर्मे ।
त्यजेत् प्राणान् प्रविशेद्धव्यवाहं न त्वेवैष व्याहरेद्धर्मवाह्यम् ।
सदा मनस्वी क्षत्रधर्मे रतश्च कुन्त्याः प्राणैरिष्टतमो नृवीरः ॥ १३५ ॥
विशीर्यन्तीं नावमिवार्णवान्ते रत्नाभिपूर्णां मकरस्य पृष्ठे ।
सेनां तवेमां हतसर्वयोधां विक्षोभितां द्रक्ष्यसि पाण्डुपुत्रैः ॥ १३६ ॥
इत्येते वै कथिताः पाण्डुपुत्रा यांस्त्वं मोहादवमन्य प्रवृत्तः ।
यद्येतेभ्यो मुच्यसे रिष्टदेहः पुनर्जन्म प्राप्स्यसे जीव एव ॥ १३७ ॥

SIXTH SECTION.

वैशम्पायन उवाच

ततः पार्थाः पञ्च पञ्चेन्द्रकल्पास्त्यक्त्वा त्रस्तान् प्राञ्जलींस्तान् पदातीन्।
यथानीकं शरवर्षान्धकारं चक्रुः क्रुद्धाः सर्वतः सन्निगृह्य ॥ १३८ ॥

वैशम्पायन उवाच

सन्तिष्ठत प्रहरत तूर्णं विपरिधावत ।
इति स्म सैन्धवो राजा चोदयामास तान् नृपान् ॥ १३९ ॥
ततो घोरतमः शब्दो रणे समभवत् तदा ।
भीमार्जुनयमान् दृष्ट्वा सैन्यानां सयुधिष्ठिरान् ॥ १४० ॥
शिबिसौवीरसिन्धूनां विषादश्चाप्यजायत ।
तान् दृष्ट्वा पुरुषव्याघ्रान् व्याघ्रानिव बलोत्कटान् ॥ १४१ ॥
हैमचित्रसमुत्सेधां सर्वशैक्यायसीं गदाम् ।
प्रगृह्याभ्यद्रवद्भीमः सैन्धवं कालचोदितम् ॥ १४२ ॥
तदन्तरमथावृत्य कोटिकास्यो ऽभ्यहारयत् ।
महता रथवंशेन परिवार्य्य वृकोदरम् ॥ १४३ ॥
शक्तितोमरनाराचैर्वीरबाहुप्रचोदितैः ।
कीर्य्यमाणो ऽपि बहुभिर्न स्म भीमो ऽभ्यकम्पत ॥ १४४ ॥
गजं तु सगजारोहं पदातींश्च चतुर्दश ।
जघान गदया भीमः सैन्धवध्वजिनीमुखे ॥ १४५ ॥
पार्थः पञ्चशताञ्छूरान् पार्वतीयान् महारथान् ।
परीप्समानः सौवीरं जघान ध्वजिनीमुखे ॥ १४६ ॥
राजा स्वयं सुवीराणां प्रवराणां प्रहारिणाम् ।
निमेषमात्रेण शतं जघान समरे तदा ॥ १४७ ॥
ददृशे नकुलस्तत्र रथात् प्रस्कन्द्य खड्गधृक् ।
शिरांसि पादरक्षाणां वीजवत् प्रवपन् मुहुः ॥ १४८ ॥
सहदेवस्तु सन्धाय रथेन गजयोधिनः ।

पातयामास नाराचैर्द्रुमेभ्य इव बर्हिणः ॥ १४९ ॥
ततस्त्रिगर्त्तः सधनुरवतीर्य्य महारथात् ।
गदया चतुरो वाहान् राज्ञस्तस्य तदाऽबधीत् ॥ १५० ॥
तमभ्यासगतं राजा पदातिं कुन्तिनन्दनः ।
अर्द्धचन्द्रेण बाणेन विव्याधोरसि धर्म्मराट् ॥ १५१ ॥
स भिन्नहृदयो वीरो वक्त्राच्छोणितमुद्वमन् ।
पपाताभिमुखः पार्थं छिन्नमूल इव द्रुमः ॥ १५२ ॥
इन्द्रसेनद्वितीयस्तु रथात् प्रस्कन्द्य धर्म्मराट् ।
हताश्वः सहदेवस्य प्रतिपेदे महारथम् ॥ १५३ ॥
नकुलं त्वभिसन्धाय क्षेमङ्करमहामुखौ ।
उभावुभयतस्तीक्ष्णैः शरवर्षैरवर्षताम् ॥ १५४ ॥
तोमरैरभिवर्षन्तौ जीमूताविव वार्षिकौ ।
एकैकेन विपाठेन जघ्ने माद्रवतीसुतः ॥ १५५ ॥
त्रिगर्त्तराजः सुरथस्तस्याथ रथधूर्गतः ।
रथमाक्षेपयामास गजेन गजयानवित् ॥ १५६ ॥
नकुलस्त्वपभीस्तस्माद्रथाच्चर्मासिपाणिमान् ।
उद्भ्रान्तं स्थानमास्थाय तस्थौ गिरिरिवाचलः ॥ १५७ ॥
सुरथस्तं गजवरं बधाय नकुलस्य तु ।
प्रेषयामास सक्रोधमभ्युच्छ्रितकरं ततः ॥ १५८ ॥
नकुलस्तस्य नागस्य समीपे परिवर्त्तिनः ।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ॥ १५९ ॥
स विनद्य महानादं गजः कङ्कणभूषणः ।

पतन्नवाक्शिरा भूमौ हस्त्यारोहानपातयत् ॥ १६० ॥
स तत्कर्म महत् कृत्वा शूरो माद्रवतीसुतः ।
भीमसेनरथं प्राप्य शर्म्म लेभे महारथः ॥ १६१ ॥
भीमस्त्वापततो राज्ञः कोटिकास्यस्य सङ्गरे ।
सूतस्य नुदतो वाहान् क्षुरेणापाहरच्छिरः ॥ १६२ ॥
न बुबोध हतं सूतं स राजा बाहुशालिना ।
तस्याश्वा व्यद्रवन् सङ्ख्ये हतसूतास्ततस्ततः ॥ १६३ ॥
विमुखं हतसूतं तं भीमः प्रहरतां वरः ।
जघान तलयुक्तेन प्रासेनाभ्येत्य पाण्डवः ॥ १६४ ॥
द्वादशानां तु सर्वेषां सौवीराणां धनञ्जयः ।
चकर्त्त निशितैर्भल्लैर्धनूंषि च शिरांसि च ॥ १६५ ॥
शिवीनिक्ष्वाकुमुख्यांश्च त्रिगर्त्तान् सैन्धवानपि ।
जघानातिरथः सङ्ख्ये बाणगोचरमागतान् ॥ १६६ ॥
सादिताः प्रत्यदृश्यन्त बहुशः सव्यसाचिना ।
सपताकाश्च मातङ्गाः सध्वजाश्च महारथाः ॥ १६७ ॥
प्रच्छाद्य पृथिवीं तस्थुः सर्वमायोधनं प्रति ।
शरीराण्यशिरस्कानि विदेहानि शिरांसि च ॥ १६८ ॥
श्वगृध्रकङ्ककाकोलभासगोमायुवायसाः ।
अतृप्यंस्तत्र वीराणां हतानां मांसशोणितैः ॥ १६९ ॥
हतेषु तेषु वीरेषु सिन्धुराजो जयद्रथः ।
विमुच्य कृष्णां सन्त्रस्तः पलायनमनाऽभवत् ॥ १७० ॥
स तस्मिन् सङ्कुले सैन्ये द्रौपदीमवतार्य्य ताम् ।

प्राणप्रेप्सुरुपाधावत् वनं येन नराधमः ॥ १७१ ॥
द्रौपदीं धर्म्मराजस्तु दृष्ट्वा धौम्यपुरस्कृताम् ।
माद्रीपुत्रेण वीरेण रथमारोपयत् तदा ॥ १७२ ॥
ततस्तद्विद्रुतं सैन्यमपयाते जयद्रथे ।
आदिश्यादिश्य नाराचैराजघान वृकोदरः ॥ १७३ ॥
सव्यसाची तु तं दृष्ट्वा पलायन्तं जयद्रथम् ।
वारयामास निघ्नन्तं भीमं सैन्धवसैनिकान् ॥ १७४ ॥

अर्जुन उवाच

यस्यापचारात् प्राप्तो ऽयमस्मान् क्लेशो दुरासदः ।
तमस्मिन् समरोद्देशे न पश्यामि जयद्रथम् ॥ १७५ ॥
तमेवान्विष भद्रं ते किं ते योधैर्निपातितैः ।
अनामिषमिदं कर्म कथं वा मन्यते भवान् ॥ १७६ ॥

वैशम्पायन उवाच

इत्युक्तो भीमसेनस्तु गुडाकेशेन धीमता ।
युधिष्ठिरमभिप्रेक्ष्य वाग्मी वचनमब्रवीत् ॥ १७७ ॥
हतप्रवीरा रिपवो भूयिष्ठं विद्रुता दिशः ।
गृहीत्वा द्रौपदीं राजन् निवर्त्ततु भवानितः ॥ १७८ ॥
यमाभ्यां सह राजेन्द्र धौम्येन च महात्मना ।
प्राप्याश्रमपदं राजन् द्रौपदीं परिसान्त्वय ॥ १७९ ॥
न हि मे मोक्ष्यते जीवन् मूढः सैन्धवको नृपः ।
पातालतलसंस्थो ऽपि यदि शक्रो ऽस्य सारथिः ॥ १८० ॥

युधिष्ठिर उवाच

न हन्तव्यो महाबाहो दुरात्मा ऽपि स सैन्धवः ।
दुःशलामभिसंस्मृत्य[1] गान्धारीं च यशस्विनीम् ॥ १८१ ॥

वैशम्पायन उवाच

तच्छ्रुत्वा द्रौपदी भीममुवाच व्याकुलेन्द्रिया ।
कुपिता ह्रीमती प्राज्ञा पती भीमार्जुनावुभौ ॥ १८२ ॥
कर्त्तव्यं चेत् प्रियं मह्यं वध्यः स पुरुषाधमः ।
सैन्धवापसदः पापो दुर्म्मतिः कुलपांसनः ॥ १८३ ॥
भार्य्याभिहर्त्ता वैरी यो यश्च राज्यहरो रिपुः ।
याचमानो ऽपि सङ्ग्रामे न मोक्तव्यः कथञ्चन ॥ १८४ ॥
इत्युक्तौ तौ नरव्याघ्रौ ययतुर्यत्र सैन्धवः ।
राजा निववृते कृष्णामादाय सपुरोहितः ॥ १८५ ॥
स प्रविश्याश्रमपदं व्यपविद्धवृषीमठम् ।
मार्कण्डेयादिभिर्विप्रैरनुकीर्णं ददर्श ह ॥ १८६ ॥
द्रौपदीमनुशोचद्भिर्ब्राह्मणैस्तैः समाहितैः ।
समियाय महाप्राज्ञः सभार्यो भ्रातृमध्यगः ॥ १८७ ॥
ते स्म तं मुदिता दृष्ट्वा पुनः प्रत्यागतं नृपम् ।
जित्वा तान् सिन्धुसौवीरान् द्रौपदीं चाहृतां पुनः ॥ १८८ ॥
स तैः परिवृतो राजा तत्रैवोपविवेश ह ।
प्रविवेशाश्रमं कृष्णा यमाभ्यां सह भाविनी ॥ १८९ ॥

[1] Duhśalá was the wife of Jayadratha. She was the daughter of Dhritaráshtra, and consequently first-cousin of the Pándavas.

भीमसेनार्जुनौ चापि श्रुत्वा क्रोशगतं रिपुम् ।
स्वयमश्वांस्तुदन्तौ तौ जवेनैवाभ्यधावताम् ॥ १९० ॥
इदमत्यद्भुतं चात्र चकार पुरुषोऽर्जुनः ।
क्रोशमात्रगतानश्वान् सैन्धवस्य जघान यत् ॥ १९१ ॥
स हि दिव्यास्त्रसम्पन्नः कृच्छ्रकालेऽप्यसम्भ्रमः ।
अकरोद्दुष्करं कर्म्म शरैरस्त्रानुमन्त्रितैः ॥ १९२ ॥
ततोऽभ्यधावतां वीरावुभौ भीमधनञ्जयौ ।
हताश्वं सैन्धवं भीतमेकं व्याकुलचेतसम् ॥ १९३ ॥
सैन्धवस्तु हतान् दृष्ट्वा तथाऽश्वान् स्वान् सुदुःखितः ।
अतिविक्रमकर्माणि कुर्वाणं च धनञ्जयम् ॥ १९४ ॥
पलायनकृतोत्साहः प्राद्रवद्येन वै वनम् ।
सैन्धवं त्वभिसम्प्रेक्ष्य पराक्रान्तं पलायने ॥ १९५ ॥
अनुयाय महाबाहुः फाल्गुनो वाक्यमब्रवीत् ।
अनेन वीर्य्येण कथं स्त्रियं प्रार्थयसे बलात् ॥ १९६ ॥
राजपुत्र निवर्त्तस्व न ते युक्तं पलायनम् ।
कथं ह्यनुचरान् हित्वा शत्रुमध्ये पलायसे ॥ १९७ ॥
इत्युच्यमानः पार्थेन सैन्धवो न न्यवर्त्तत ।
तिष्ठ तिष्ठेति तं भीमः सहसाऽभ्यद्रवद्बली ।
मा वधीरिति पार्थस्तं दयावान् प्रत्यभाषत ॥ १९८ ॥

॥ इति द्रौपदीहरणम् ॥

जयद्रथविमोक्षणम्

वैशम्पायन उवाच

जयद्रथस्तु सम्प्रेक्ष्य भ्रातरावुद्यतायुधौ ।
प्राधावत् तूर्णमव्यग्रो जीवितेप्सुः सुदुःखितः ॥ १ ॥
तं भीमसेनो धावन्तमवतीर्य्य रथाद्बली ।
अभिद्रुत्य निजग्राह केशपक्षे ह्यमर्षणः ॥ २ ॥
समुद्यम्य च तं भीमो निष्पिपेष महीतले ।
शिरो गृहीत्वा राजानं ताडयामास चैव ह ॥ ३ ॥
पुनः सञ्जीवमानस्य तस्योत्पतितुमिच्छतः ।
पदा मूर्द्ध्नि महाबाहुः प्राहरद्विलपिष्यतः ॥ ४ ॥
तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना ।
सम्मोहमगमद्राजा प्रहारवरपीडितः ॥ ५ ॥
विरोषं भीमसेनं तु वारयामास फाल्गुनः ।
दुःशलायाः कृते राजा यत्तदाहेति कौरवः ॥ ६ ॥

भीम उवाच

नायं पापसमाचारो मत्तो जीवितुमर्हति ।
कृष्णायास्तदनर्हायाः परिक्लेष्टा नराधमः ॥ ७ ॥
किन्तु शक्यं मया कर्त्तुं यद्राजा सततं घृणी ।

त्वं च बालिशया बुद्ध्या सदैवास्मान् प्रबाधसे ॥ ८ ॥
एवमुक्त्वा सटास्तस्य पञ्च चक्रे वृकोदरः ।
अर्द्धचन्द्रेण बाणेन किञ्चिदब्रुवतस्तदा ॥ ९ ॥
विकत्थयित्वा राजानं ततः प्राह वृकोदरः ।
जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ॥ १० ॥
दासोऽस्मीति त्वया वाच्यं संसत्सु च सभासु च ।
एवं ते जीवितं दद्यामेष युद्धजितो विधिः ॥ ११ ॥
एवमस्त्विति तं राजा कृष्यमाणो जयद्रथः ।
प्रोवाच पुरुषव्याघ्रं भीममाहवशोभनम् ॥ १२ ॥
तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः ।
रथमारोपयामास विसञ्ज्ञं पांशुगुण्ठितम् ॥ १३ ॥
ततस्तं रथमास्थाय भीमः पार्थानुगस्तदा ।
अभ्येत्याश्रममध्यस्थमभ्यगच्छद्युधिष्ठिरम् ॥ १४ ॥
दर्शयामास भीमस्तु तदवस्थं जयद्रथम् ।
तं राजा प्राह स दृष्ट्वा मुच्यतामिति चाब्रवीत् ॥ १५ ॥
राजानं चाब्रवीद्भीमो द्रौपद्याः कथ्यतामिति ।
दासभावं गतो ह्येष पाण्डूनां पापचेतनः ॥ १६ ॥
तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः ।
मुञ्चेममधमाचारं प्रमाणा यदि ते वयम् ॥ १७ ॥
द्रौपदी चाब्रवीद्भीममभिप्रेक्ष्य युधिष्ठिरम् ।
दासोऽयं मुच्यतां राज्ञस्त्वया पञ्चसटः कृतः ॥ १८ ॥
स मुक्तोऽभ्येत्य राजानमभिवाद्य युधिष्ठिरम् ।

ववन्दे विह्वलो राजंस्तांश्च दृष्ट्वा मुनींस्तदा ॥ १९ ॥
तमुवाच घृणी राजा धर्मपुत्रो युधिष्ठिरः ।
तथा जयद्रथं दृष्ट्वा गृहीतं सव्यसाचिना ॥ २० ॥
अदासो गच्छ मुक्तोऽसि मैवं कार्षीः पुनः क्वचित् ।
स्त्रीकामं वा धिगस्तु त्वां क्षुद्रः क्षुद्रसहायवान्
एवंविधं हि कः कुर्य्यात् त्वदन्यः पुरुषाधमः ॥ २१ ॥
गतसत्त्वमिव ज्ञात्वा कर्त्तारमशुभस्य तम् ।
तं प्रेक्ष्य भरतश्रेष्ठ कृपां चक्रे नराधिपः ॥ २२ ॥
धर्मे ते वर्द्धतां बुद्धिर्मा चाधर्मे मनः कृथाः ।
साश्वः सरथपादातः स्वस्ति गच्छ जयद्रथ ॥ २३ ॥
एवमुक्तस्तु सव्रीडं तूष्णीं किञ्चिदवाङ्मुखः ।
जगाम राजन् दुःखार्त्तो गङ्गाद्वाराय भारत ॥ २४ ॥
स देवं शरणं गत्वा विरूपाक्षमुमापतिम्[1][2] ।
तपश्चचार विपुलं तस्य प्रीतो वृषध्वजः[3] ॥ २५ ॥
बलिं स्वयं प्रत्यगृह्णात् प्रियमाणस्त्रिलोचनः[4] ।
वरं चास्मै ददौ देवः स जग्राह च तच्छृणु ॥ २६ ॥

जयद्रथ उवाच

समस्तान् सरथान् पञ्च जयेयं युधि पाण्डवान् ।

[1] *Virúpáksha*, a name of Śiva—the god with deformed (*virúpa*) eyes (*akshi*); Śiva being usually represented with a third eye in the middle of his forehead.

[2] *Umápati*—the husband of *Umá*, the daughter of *Himálaya*, the king of mountains.

[3] *Vrisha-dhwaja.* The banner or emblem of Śiva is the bull *Nandi*, whose image is always conspicuously seen at the temples dedicated to the divinity.

[4] *Trilochana*, 'the three-eyed,' a name of Śiva.

इति राजा ऽब्रवीद्देवं नेति देवस्तमब्रवीत् ॥ २७ ॥
अजय्यांश्चाप्यबध्यांश्च वारयिष्यसि तान् युधि ।
ऋते ऽर्जुनं महाबाहुं नरं[1] नाम सुरेश्वरम् ॥ २८ ॥
बदर्य्यां[2] तप्ततपसं नारायणसहायकम् ।
अजितं सर्वलोकानां देवैरपि दुरासदम् ॥ २९ ॥
मया दत्तं पाशुपतं[3] दिव्यमप्रतिमं शरम् ।
अवाप लोकपालेभ्यो[4] वज्रादीन् स महाशरान् ॥ ३० ॥
देवदेवो[5] ह्यनन्तात्मा विष्णुः सुरगुरुः प्रभुः ।
प्रधानपुरुषो ऽव्यक्तो विश्वात्मा विश्वमूर्त्तिमान् ॥ ३१ ॥
युगान्तकाले[6] सम्प्राप्ते कालाग्निर्दहते जगत् ।
सपर्वतार्णवद्वीपं सशैलवनकाननम् ॥ ३२ ॥
निर्दहन् नागलोकांश्च पातालतलचारिणः ।

[1] *Nara* is the name of a holy sage, called hyperbolically, the sovereign of the gods; supposed to have been the same as Arjuna in a former existence, and therefore here applied to him.

[2] *Badarí* is properly the jujube-tree; but it is applied to a part of the Himálaya, where the tree may perhaps have grown: and is here represented as the scene of the religious austerities performed by the two *Munis*, Nara and Náráyańa. It is more commonly known as Badrí-náth; and is a town and temple on the west bank of the branch of the Ganges, called the Alakanandá. It is still a place of pilgrimage sacred to Śiva.

[3] The *Páśupata* arrow is named after Śiva; one of whose appellations is Paśupati, 'the lord of animals.'

[4] The *Loka-pálas* are either four in number, holy persons, sons of different patriarchs; or they are Indra and other seven minor deities, exercising the office of guardians of the worlds or spheres of the universe. Vishńu Puráńa, pp. 169, 226.

[5] An abrupt and rather suspicious transition is made in this part of the text from Arjuna to Vishńu, of whom these different words are names or epithets.

[6] *Yugánta-kále.* A *Yuga* is a division of time peculiar to Hindu mythological chronology. It is used here, however, in a general sense, to signify a definite period, the duration of which is afterwards more particularly specified.

अथान्तरीक्षे सुमहन्नानावर्णाः पयोधराः ॥ ३३ ॥
घोरस्वरा विनदिनस्तडिन्मालावलम्बिनः ।
समुत्तिष्ठन् दिशः सर्वा विवर्षन्तः समन्ततः ॥ ३४ ॥
ततोऽग्निं नाशयामासुः संवर्त्ताग्निनियामाकाः ।
अक्षमावैश्च धाराभिस्तिष्ठन्त्यापूर्य्य सर्वशः ॥ ३५ ॥
एकार्णवे तदा तस्मिन्नुपशान्ते चराचरे ।
नष्टचन्द्रार्कपवने ग्रहनक्षत्रवर्जिते ॥ ३६ ॥
चतुर्युगसहस्रान्ते[1] सलिलेनाप्लुता मही ।
ततो नारायणाख्यस्तु सहस्राक्षः सहस्रपात् ॥ ३७ ॥
सहस्रशीर्षा पुरुषः स्वप्नुकामस्त्वतीन्द्रियः ।
फटासहस्रविकटं शेषं पर्यङ्कभोगिनम् ॥ ३८ ॥
सहस्रमिव तिग्मांशुसङ्घातममितद्युतिम् ।
कुन्देन्दुहारगोक्षीरमृणालकुमुदप्रभम् ॥ ३९ ॥
तत्रासौ भगवान् देवः स्वपन् जलनिधौ तदा ।

[1] *Chaturyuga-sahasránte*, 'At the end of a thousand (repetitions) of four ages.' The four *Yugas* or ages are, the *Kr̆ita*, the *Treta*, the *Dwápara* and *Kali* ages. They form together a period of 12,000 years of the gods, or 4,320,000 years of mortals; constituting a *Maháyuga*, or great age. One thousand such great ages form a day of Brahmá; at the end of which he takes a nap, and a night of equal duration ensues. During the night, the world, that is, the earth or sphere of mortals and the orbits of the planets, is destroyed by fire; to which a deluge succeeds, that lasts until the morning returns, and Brahmá wakes. He then recreates all things, as they were before, to last through another of his days. The destruction thus occurring is only partial; various celestial spirits, sages, and gods, being exempt from it: but at the end of 100 years, Brahmá himself expires, and then the destruction, or rather dissolution, is universal; all existing forms being resolved into crude elemental matter according to some opinions, into universal spirit according to others. In either case, the dissolution is only temporary; for primeval matter or primeval spirit is alike indestructible, and, when moved to action, renews creation. Vishńu Puráná, p. 631.

नैशेन तमसा व्याप्तां स्वां रात्रिं कुरुते विभुः ॥ ४० ॥
सत्त्वोद्रेकात् प्रबुद्धस्तु शून्यं लोकमपश्यत ।
इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ॥ ४१ ॥
[1]आपो नारास्तु तनव इत्यपां नाम शुश्रुम ।
अयनं तेन चैवास्ते तेन नारायणः स्मृतः ॥ ४२ ॥
प्रध्यानसमकालं तु प्रजाहेतोः सनातनः ।
ध्यानमात्रे तु भगवन्[2]नाभ्यां पद्मः समुत्थितः ॥ ४३ ॥
ततश्[3]चतुर्मुखो ब्रह्मा नाभिपद्माद्विनिःसृतः ।
तत्रोपविष्टः सहसा पद्मे लोकपितामहः ॥ ४४ ॥
शून्यं दृष्ट्वा जगत् कृत्स्नं मानसानात्मनः समान् ।
ततो मरीचिप्रमुखान् महर्षीनसृजन्[4]नव ॥ ४५ ॥

[1] *Ápo nárá.* This verse occurs, with some variety of reading, in Manu, ch. i. v. 10, and is there partly explained; as he calls waters the sons or progeny of *Nara* (*Nara-sunavah*). Nara, literally 'a man,' is in this passage used for the primeval male, or the Supreme Spirit. The text has, "We have heard (that is, it is said in the Vedas) that waters are called *Nárás*," *i. e.* derivatives from *Nara,* which agrees with Manu: but they are also, it is said, "called (in the Vedas) bodies or forms (*tanavah*);" by which it is probably intended to signify, that waters were the first visible substance in which the Supreme manifested his essence or creative power. The sentence '*Ápo nárás tanavah*' is to be considered as a quotation from the Vedas.

[2] The sleep of Vishńu, the production of a lotus from his navel, and that of Brahmá the instrumental cause of creation from that lotus, are inconsistent with the more simple description of the alternate periods of dissolution and renovation, as dependent upon the night and day of Brahmá: and it seems likely that they are mythological embellishments of an older and less complicated system.

[3] Brahmá is represented with four heads.

[4] The great *Rishis,* or mind-born sons of Brahmá, are variously enumerated, as seven, eight, nine, as far as seventeen. They are the immediate ancestors of all kinds of living beings; and are therefore called *Prajápatis,* 'lords of creation.' For a detailed account of them and their posterity, see the Vishńu Puráńa, B. i. chap. vii and x.

ते ऽसृजन् सर्वभूतानि त्रसानि स्थावराणि च ।
यक्षराक्षसभूतानि पिशाचोरगमानुषान् ॥ ४६ ॥
सृजते ब्रह्ममूर्त्तिस्तु रक्षते पौरुषी तनुः ।
रौद्रीभावेन शमयेत् तिस्रो ऽवस्थाः प्रजापतेः[1] ॥ ४७ ॥
न श्रुतं ते सिन्धुपते विष्णोरद्भुतकर्म्मणः ।
कथ्यमानानि मुनिभिर्ब्राह्मणैर्वेदपारगैः ॥ ४८ ॥
जलेन समनुप्राप्ते सर्वतः पृथिवीतले ।
तदा चैकार्णवे तस्मिन्नेकाकाशे प्रभुश्चरन् ॥ ४९ ॥
निशायामिव खद्योतः प्रावृट्काले समन्ततः ।
प्रतिष्ठानाय पृथिवीं मार्गमाणस्तदा ऽभवत् ॥ ५० ॥
जले निमग्नां गां दृष्ट्वा चोद्धर्त्तुं मनसेच्छति ।
किन्नु रूपमहं कृत्वा सलिलादुद्धरे महीम् ॥ ५१ ॥
एवं सञ्चिन्त्य मनसा दृष्ट्वा दिव्येन चक्षुषा ।
जलक्रीडाभिरुचितं वाराहं[2] रूपमस्मरत् ॥ ५२ ॥

[1] *Prajápati*, in this verse, means Vishńu, as identified with the Supreme Being; who, as Brahmá, creates all things; as Vishńu, in a bodily form—that is, as Krishńa or some other of his *Avatáras*—preserves all things, and, in the character of Rudra (or Śiva), is the author of their dissolution. These are the three *avasthás* or hypostases of the Supreme. Of the *avatáras*, literally 'descents' of Vishńu, some of the principal are presently described in the text.

